Gurubhavaprakasika

गुरुभावप्रकाशिका

परस्तस्मादित्यादि श्लोकद्वयोपादानानन्तरं इति शब्दाभावात् अथेत्याद्यवतारिकायाः व्याख्येयं दर्शयति पर इत्यादीति । परमगतिशब्दस्वारस्यादपुनरावृत्तिप्रसिद्धेश्च भगवत्परत्वं श्लोकद्वयस्याशङ्क्य आह अयमभिप्राय इति । भूमिराप इत्यादि । ' अहंकार इतीयं मे भिन्नां प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां ।। जीवभूतां महाबाहो ययेदं धार्यते जगत् ' ।। इत्यत्र परशब्दान्यशब्दयोः अत्र प्रत्यभिज्ञानात् मे प्रकृतिमिति जीवस्य भगवत्सम्बन्धित्वोक्तेः । तद्धामपरमं मम इत्यनेनप्रत्यभिज्ञानाच्च । जीवविषयत्वम् ..... परत्वेनेति ननु कैवल्यस्यानित्यत्वपक्षे यं प्राप्य न निवर्तन्त इत्ययुक्तमित्याशङ्क्याह वक्तव्याचेति वक्तुमर्हेत्यर्थः । अपरोक्षाभावादिति । मधुविद्यान्यायादितिभावः ।

वस्तुतस्तु कैवल्यनित्यत्वपक्षे नातिस्वारस्ये नार्चिरादिगत्यनन्तरमेव कैवल्यप्राप्त्या अपुनरावृतिस्स्वारसिकीति तात्पर्यं । अत एवेति पौनरुक्त्या त्रेधा प्रत्यभिज्ञानात् वक्तुमर्हत्वाच्चेत्यर्थः । तस्मादिति पञ्चम्यन्त तच्छब्देन अव्यक्ताद्व्यक्तयस्सर्वा इति प्रकृताव्यक्तपरामर्शात्तत्समभिव्याहारबलेन अव्यदित्येव पदच्छेद इत्यभिप्रेत्याह - अव्यक्तादित्यव्यक्तस्यैवेति द्वाभ्यामन्नय इति प्रतियोगि समर्पकत्वेनान्वय इत्यर्थः । तत्र चेति परशब्दान्यशब्दयोरिति शेषः । उत्कृष्ट इति परशब्दार्थकथनं । पुरुषार्थतदेत्युत्कर्षोपपादनमित्याह - उत्कृष्टत्वेति । अन्यशब्दस्य विसजातीयलक्षणायां मूलमाह - तत एवेति । परशब्दादेवेत्यर्थः । उत्कर्षस्य भेदप्राप्तत्वादिति भावः । प्रकारपर इति । अन्यशब्दोऽन्यादृश लाक्षणिक इत्यर्थः । अचेतने सोपाधिकभोग्यत्वस्य . चेतने निरूपाधिकभोग्यत्वस्य च शास्त्रैकगम्यत्वात् । उत्कर्षस्य पुरुषार्थतयोपपादनं कृतम् । वैजात्यस्य तु इदमहं जानामीति लोकेज्ञात्रृज्ञेयभावेन प्रसिद्घत्वान्नोपपादनमित्यभिप्रायेणाह स चेति । विशेष्यविघ्नयोः परशब्दान्यशब्दयोः विशेष्यसमर्पकतया भावशष्दसाफल्यमभिप्रेत्याह भावशब्द इति । अव्यक्त इति पदच्छेदे मूलमाह व्यक्त इतीति । अत्रैवेति । प्रकृतविशेष्ये पूर्वोत्तरानुवाददशायामव्यक्तत्वेनानुवादादिति भावः । युक्त्यन्तरमाह दुर्ग्रहेचेति । स्वसमवेद्यत्वस्वासाधारणत्वयोः प्रयोजनमाह नन्विति । अहं जानामीत्यादि प्रत्यक्षेण अहंत्वज्ञातृत्वादेः न्यायागमाभ्यां देहातिरिक्तत्व नित्यत्वाणुत्वादेः आगममात्रेण भगवत्पारतन्त्र्यदेश्च सिद्घिमभिप्रेत्य यथासम्भवमित्युक्तम् । असाधारणशब्देन ज्ञात्रृत्वादिव्यावृत्तिः । स्वसंवेद्यपदेन खपुष्पव्यावृतिः । तत्तदात्मव्यक्तित्वस्य

स्वप्रकाशैकगम्यत्वादिति भावः । ज्ञात्रृत्वनित्यत्वाणुत्वादिकं साधारणाकार इत्यभिप्रायेणाह प्रमाणान्तराणीति । उत्पत्तिविनाशानर्हत्वे मूलमाह नित्यत्वे इति द्वितीयाध्याये उत्पत्तिविनाशानर्हत्वेननित्यत्वसाधनादिति भावः । भूतपदस्यसत्तायोगिपरत्वस्य प्राणिपरत्वस्य च बाधादाह भूतशब्द इति । यस्य संर्वेष्वित्यरय भाष्याभिप्रेतं प्रयोजनमाह तद्विनाशेपीति । भूतेष्वित्यनेनैव पञ्चभूतसिद्धया सर्वपदवैयर्थ्यमाशंक्य महदादिषु व्यभिचारवारकं तदित्यभिप्रायेण सकारणेष्वित्याद्युक्तमित्याहा तत्र सर्वशब्देति विनाशित्व शङ्का बीजद्योतनायकार्यस्यापि सर्वशब्दान्तर्भावः । कृत इत्याशयेनाह प्रसक्तोहीति कार्यानुप्रवेशो नात्र कण्ठोक्त इत्यत आह ,

ततश्चेति । जीवानुप्रवेशं विना कार्यसैवाभावात् कार्यानुप्रवेशो वस्तुस्वभावलष्ध इति तात्पर्यमाहा सामार्थ्यलब्धइति सोऽव्यक्तोक्षर इत्युक्तइति भाष्ये स इत्यस्याध्याहार इति योजनान्तरञ्च स इति पूर्वतच्छब्दस्य व्यवहितान्वयास्वारस्यरूपपूर्वापरितोषेण वक्ष्यन् व्यवहितान्वययोजनायामुत्तरापरितोषं दर्शयन् व्यवहितान्वययोजनामाह , यस्ससर्वेष्वित्यत्रेति । अक्षरं ब्रह्मपरमित्यक्षरत्वेन अव्यक्तोव्यक्ता त्सनातन इत्यव्यक्तत्वेनाक्षरत्वेन च परमात्मा निर्दिश्यत इति भ्रमवारणायाक्षरत्वेनाव्यक्तत्वेने च पूर्वापरग्रन्थोक्तो जीव एवअत्राप्युच्युत इति वक्तुमव्यक्तोक्षर इत्युक्त इति गीताचार्येण निर्दिष्टं , तत्रय इत्येतत्प्रतिनिर्देशकतया सोव्यक्तोक्षर इत्युक्त इति तत्पदमावश्यकम् । यस्ससर्वेष्विति यच्छब्दस्योत्तरयच्छब्दत्वमाश्रित्यप्रकृतपरत्वे अव्यक्तोक्षर इत्युक्त इत्यस्यानन्वय प्रसङ्गात् पूर्वापरप्रकरणोक्तत्वस्य परपक्षपरत्वभ्रमवारणाय एतत्प्रकरणप्रतिपाद्या पेक्षया विधेयविशेषणतया अव्यक्तोऽक्षर इत्युक्तो येन विनश्यतीत्युद्देश्य विशेषणत्वासम्भवात् । अतो येन विनश्यति सोव्यक्तोक्षर इत्युक्त इति पूर्व यच्छब्दत्वमाश्रित्य तच्छब्दसापेक्षत्वं वक्तव्यं , अव्यक्तोक्षर इत्युक्त इत्यस्यै तत्प्रकरणोक्तत्वपरत्वे वैयर्थ्यं, स्फुटं, यच्छब्दस्योत्तरयच्छब्दत्वेपि विधेयविशेषणान्वयायासोव्यक्तोक्षर इत्युक्त इत्युत्तरत्र तच्छब्द आवश्यकः । एवं च यस्स इति तच्छब्दो व्यर्थः योविनश्यतीत्येव पर्याप्तेः तच्छब्दस्या व्यंवहितसनातनत्व परामर्शित्वस्य वक्तव्यतया नश्यत्स्वविनाशात् सनातन इति साध्यसमर्पकतया तच्छब्दस्य प्रयोजनत्वेपि तस्य सन्निधानादेव सिद्घयाव्यर्थप्रायत्वात् । अणुत्वादिनासाध्यो उत्पत्तिविनाशानर्हत्वरूप द्वितीया ध्यायोक्तहेतुनासनातनत्वसिद्घावपि प्रयाससाध्य तया

सर्वेषु नश्यत्सु अविनाशकस्यहेत्वन्तरस्यानायास सिद्घत्वेन अवश्यवक्तव्यत्वेपि सनातन इत्यस्य तत्नत्रे नोभयत्रसाध्यसमर्पकसम्भवात् । तथा च यस्सइत्यनपेक्षितोक्तिस्स्यात् उत्तरानन्वये अपेक्षितानुक्तिस्स्यादिति भावः । यद्वेति । अयं सोव्यक्तोक्षर इत्युक्त इति भाष्यस्थ तच्छष्द इत्यर्थः । अध्याहार इत्यनेन स्वरूपव्याक्रियैव निराक्रियेत्यप्युत्तरापरितोषस्सूचितः । किञ्चपुरूषार्थत्वज्ञात्रृत्वाव्यक्तत्व सनातनत्वरूपाचिद्वैलक्षण्येषु चरमवैलक्षण्यपरस्य सनातनपदस्य तन्त्रेणोत्तरहेत्वपेक्षया साध्यपरत्वं क्लिष्टमित्यपि पूर्वपरितोषोप्यनुसन्धेयः । एतत्प्रकरणं विहाय प्रकरणान्तरोक्तिः किमत्याशंक्य एतत्प्रकरणोक्तत्वोक्तेर्व्यर्थत्वात् । एतत्प्रकरणस्य परमात्मपरत्वशङ्कापरिहारकत्वाभावाच्च प्रकरणान्तरोक्तिरित्यभिप्रायेणावतारयति उक्त इत्यस्येति । प्रकरणान्तरमपि परमार्थपरंकिं नस्यादित्यत आह अनयोरिति । येत्वक्षरमिति प्रकरणस्यकूटस्थोक्षरइति तदुत्तरप्रकरणेचेत्यर्थ इत्यादिभेद व्यपदेशादिति । आदिशष्देन येत्वक्षरमित्यादि प्रकरणे तेमेयुक्ततमामता इति पूर्ववाक्ये मां सुखेनाचिरात्प्राप्नुवन्तीति भाष्येण व्याख्याते भगवदुपासकानां सुखेनाचिराद्ब्रह्मप्राप्तिमुक्तवायोत्वित्यात्मोपासकानां वैषम्योक्तिपूर्वकं केशाधिकतरस्तेषामव्यक्तासक्त चेतसां । अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यते । इति श्लोकेन क्लेशेनजीवात्मप्रतिपादकेन अव्यक्ताक्षरशब्दितजीवस्यपरमात्मापेक्षया भेदनिर्देशोगृह्यते । प्रकरणान्तरयोर्जीवपरत्वेपि श्रुतिप्रिसिद्घया अत्रत्याक्षरा व्यक्तशब्दयोः परमात्मपरत्वं किंनस्यादिति शंकायां प्रकरणान्तरोक्तत्वं प्रत्यभिज्ञानमुखेन तदैकार्थ्योपपादकमित्यभिप्रायेणाह अतोत्रापीति । नन्विति वक्ष्यमाणस्य उक्त इति भूतनिर्देशानुपपत्या वक्ष्यमाणप्रकरणस्थस्य . मुक्तजीवस्वरूपस्य अव्यक्तोक्षर इत्युक्त इति । उक्त शब्दार्यत्वेनाभेदान्वयप्रदर्शनं नसम्भवतीत्यर्थः । । उपब्रह्मणीयश्रुतिं विना उपब्रह्मणासम्भवात् श्रुतेश्चानादितया वक्ष्यमाणप्रकरणस्थस्य तत्कलिश्रुत्युक्तत्वे न भूत निर्देशोपपत्तिरित्यभिप्रायेण परिहरति । तत्तत्प्रकरणेति । मयैवैते निहता इत्यत्र पूर्वमेवेत्यनेन क्तप्रत्ययकर्मत्वमात्रपरत्वासम्भवात् भविष्यन्त्या अपि निहति क्रियायाः मयैवेते इत्याद्युक्तेः पूर्वमेव

संकल्पतया संकल्पद्वाराभूतत्वान्वयवत् प्रकृतेत्युक्ति क्रियायाः भूतत्वान्वयस्सम्भवतीति परिहारान्तरमाह । निहता इत्यादि । अत्रपूर्वपरिहारे उक्तक्रियायां वक्तृकर्तृकत्व स्वारस्यालाभः । तन्मुखेन प्रत्यभिज्ञान सैकर्यालाभश्च पूर्वापरितोषः । द्वितीयपरिहारे

प्रकृत्यर्थे प्रत्ययार्थस्य साक्षादन्वयालाभः उत्तपरितोषोऽभिप्रेत इत्यनुसंन्धेयं , सूत्रं सूत्रविदोविदुरित्यादाविवगातिविद इति प्रकृतक्रियाकर्मत्वेनोपस्थितार्थविदां कर्त्रृत्वेनान्वयपरित्यागेन वेद विदां कर्त्रृत्वेनान्वयप्रदर्शनानुपपत्तिरित्याशंक्य वेदवित्पदस्यप्रकरणोपस्थितत्वात् प्रकृतार्थे प्रमाणलम्भकत्वाच्च वेद विद इति कत्रध्याहारः कृत्य इत्याशयेनाह आहुरित्यत्रेति । एकप्रकरणपरमगतिशब्दद्वयस्य एकार्थकत्वस्पाद्यात् अयमेवेत्यादि भाष्यवैफल्यमाशंक्य यः प्रयातीत्यत्रसामान्येन परमागातित्वेनोक्तः चतुर्था अचिद्विलक्षणमुक्तजीव इति वक्तुं तमाहुः परमांगाति मित्युक्तम् । अतो न परमागतिशब्दद्वयपौनरुक्त्यमिति भाष्याभिप्रायमाह । सयाति परमांगतिमिति सामान्यनिर्देश इति अव्यक्तोक्षर इत्युक्त इत्यत्र उक्तशब्दे प्रकृत्यर्थेवक्तुकर्तृकत्वलाभार्थं साक्षात्प्रत्ययार्थान्वयलाभार्थं च स अव्यक्तोक्षर इत्युक्तः तमाहुः परमांगतिमिति तच्छब्दाध्याहारेण वाक्यभेदं विना योव्यक्तोक्षर इत्युक्तः तमाहुः परमांगतिमित्येकवाक्यत्वाश्रयणेन । अक्षरं ब्रह्मपरमं अव्यक्तो अव्यक्तात्सनातन इत्युक्तः यः तं सयाति परमांगतिमित्याहुरिति मूलार्थमभिप्रेत्य अयमेवेत्यादि भाष्यं प्रवृत्तं इत्याशयेनाह यद्वेति । अक्षरं ब्रह्मपरमं अव्यक्तो अव्यक्तादित्यत्र परमात्मपरत्वशंकापरिहारार्थं जीवपरत्वे निश्चित प्रकरणोक्तत्वलाभाया सः अव्यक्तोक्षर इत्युक्तः तमाहुः परमांगतिमिति वाक्यभेदेन योजना कृतेत्यपि तात्पर्यमनुसन्धेयं । अत्र च यदक्षरं वेदविदो वदन्तीत्यादि श्लोकभाष्यावसरे अस्य प्रकरणस्य परमात्मपरत्वशंकापरिहारः तात्पर्यचन्द्रिकायां प्रपञ्चितः । तद्विवरणं विस्तरभयान्नास्माभिर्लिख्यते । अव्यक्तोक्षर इत्युक्त इत्यनुवादवाक्ये अव्यक्तशब्दस्य पूर्वं व्याख्याततया अक्षर इति पदं प्रतीकोपादानपूर्वकं मुक्तात्मस्वरूपपरतया व्याख्यातं भाष्ये अक्षरशब्दस्य स्वरूपेण -क्षरणाभावपरत्वे अचिद्व्यावृत्तिस्सिध्येत् । नतु बद्धचेतनव्यावृत्तिः । असंकोचेनक्षरणाभावपरत्वे स्वरूपतस्स्वभावतश्च निरूपाधिकनिर्विकारे परमात्मस्यैव अक्षरशब्दस्य वृत्तिर्युक्तेत्याशंक्य अव्यक्तोक्षर इत्युक्त इति जीव परत्वेन निर्णीत प्रकरणोक्तत्वोक्त्या अक्षरं ब्रह्मपरमित्याद्युक्ताक्षरस्य तात्पर्यचन्द्रिकोक्तन्यायजातानुसारेण च जीवत्वसिद्धौ स्वरूपतस्स्वभावतश्च सोपाधिकनाशाभावरूपयोगार्थसंकोचस्य सम्भवतस्त्यायोगात् मुक्तात्मपरत्वोक्तिर्युक्तेत्यभिप्रायेणावतारयति अत्राक्षरेति । अत्र प्रकृतेर्मुक्तात्मनित्यर्थः । अक्षर शब्देन समानन्यायतया परमात्मनि स्वरसोपि परमगति शब्दो मुक्तात्मपरत्वेनोक्त इत्यभिप्रायेण परमगतिशब्दयोरित्युक्तं प्रयोगयोग्यतामिति निश्शेषप्रकृतिसंसर्ग वियुक्तनिरतिशयानन्दरूप - स्वाभाविकाकारेणाविर्भूतत्वम् । अक्षरत्वपरम - गतित्वान्वयितावच्छेदकमिति भावः । भगवत्स्थानत्वेन प्रसिद्धवैकुण्ठस्थानं प्राप्तस्यापुनरावृत्तिरूपं स्फुटोर्थं विहाय यं प्राप्येत्यादेरर्थान्तरकथनमयुक्तमित्या शंक्य सहश्रुतानां संभूयकारित्वव्युत्पत्या आपातप्रतीतस्यापि तस्यार्थस्य केवलाधिकारि प्राप्यपरप्रकरणानुगुणत्वात् यं प्राप्येत्यनेन मुक्तस्वरूपं प्राप्तस्यैवा पुनरावृत्तिरुच्यते । तस्यापुनरावृत्युपपादकतया परमस्थानत्वोक्तिरित्येव वक्तव्यं अत एव यमिति पुल्लिङ्ग यच्छब्दप्रयोगः । यमित्यनेन पूर्वयच्छब्दरूपेण तमाहुः परमांगतिमित्युक्ततच्छब्दार्थः परामृश्यते । तद्धामपरमं ममेत्यत्र तत्पदं प्रकृतं परंसत् धामेति विधेयलिङ्गानुसारि अन्यथास्यात् प्राप्य ननिवर्तन्ते तद्धामपरमं ममेति निर्देशापत्तिः । एवञ्च प्रकृतमुक्तात्मस्वरूपे तद्धामपरमं ममेति परमधामत्वोक्तेः अपुनरावृत्युपपादकतया अन्वयस्य वक्तव्यतया भगवतः परमनियमनस्थानं अपरिच्छिन्न ज्ञानविकासशालित्वं चोपपादकतया तद्धामपरमं

ममेत्यनेन विवक्षितमिति भाष्याभिप्रायमनुसन्धायाह अनिवृत्ति हेतुत्वेनेति । अयमन्ध इति परमनियमन स्थानत्वादिरूपार्थ इत्यर्थः । यच्छब्दस्य प्रकृतमुक्तात्मपरत्वे सत्येव तद्धामेत्यस्य वक्ष्यमानार्थं परत्वं युज्यत इत्यभिप्रायेण एवंभूतस्वरूपेणावस्थितमित्येतवन्मात्रोपादानं कृतम् । ममेति षष्ठ्या सम्बन्धसामान्यवाचितया कार्यकारणभावव्याप्यव्यापकभावशेषशेषिभावादि सम्बन्धस्ययोगतया च नियन्त्रृनियाम्यभावरूपसम्बन्धविशेष परत्वयुक्तमित्याशंक्यकार्यकारणभावा..... सम्बन्धस्य मुक्तस्वरूपविषये उत्कर्षाभावात् परमं ममधामेति समभिव्याहृतसम्बन्धविशिष्टे परमत्वोक्तिरयुक्तास्यात् । नियमनार्थत्वेतु मुक्तस्वरूपस्य स्वात्मानुभवरूपनिरतिशयानन्दप्रवर्तनत्वतद्विरोधिनिवर्तनयोः भगवत्कर्त्रृकयोः अचिद्बद्धनियमनापेक्षया उत्कृष्टत्वात् । परमं ममधामेति सम्बन्धविशिष्टे पारम्यान्वय उपपद्यते । किञ्च सम्बन्धसामान्यपरत्वेमत्सम्बन्धि यत्किञ्चिद्वस्तु न स्थानमिति वक्तव्यतया सप्रतियोगिक स्थानशब्दार्थे अस्मच्छब्दार्थस्य समभिव्याहृतस्य प्रतियोगित्वेनान्वयो न स्यात् । नियमनार्थत्वे तु नियाम्य रूपाधिष्ठेये स्थानशब्दार्थे अस्मच्छब्दार्थस्य नियन्त्रृतया प्रतियोगित्वेनान्वयस्सम्भवतीत्यभिप्रायेण सम्बन्धविशेषपरत्वमात्रमित्याशयेनाह तद्धाम ममेतीति । सम्बन्धमात्रेतिमात्रपदं कार्स्त्नपरं प्रागेवेति मुक्तेः प्रागेव सत्वादित्यर्थः । मुक्तं प्रतिसम्बन्धसामान्योत्कर्षस्य बाधितत्वादितिभावः । युक्त्यन्तरमाह स्थानस्यचेति । नियमाच्चेत्यन्वयः । मुक्तस्वरूपस्यनियमसोत्कर्षे श्रुतिं प्रमाणयति य आत्मनीति । यस्सर्वेषु भूतेषुतिष्ठन्निति पर्याये प्राणिसामान्यस्यनियमनस्थानत्वेनोक्ततया य आत्मनीति यस्सर्वेषु भूतेषुतिष्ठन्नितिपर्याये प्राणिसामान्यस्य नियमनस्थानत्वेनोक्ततया य आत्मनि तिष्ठन्निति प्रकृतिवियुक्तनिष्कृष्टात्मस्वरूपनियम्यात्वपरित्वादिति भावः । विशेषोक्ति बलान्नियमनोत्कर्षो लभ्यते नवेदेति च य आत्मनि तिष्ठन्नात्मनोन्तर इत्युक्तान्तर्बहिर्व्याप्त्योर्देशकालविषया परिच्छेदेनमुक्तस्यापीयत्तयादुर्विज्ञेयत्व परमित्यपि तात्पर्यम् । स्थानपर्यायेति वक्ष्यमाणयोजनाव्यावृत्यर्थ मुक्तम् । अचित्बद्धजीवयोरपि भगवन्नियाम्यत्वात् पारम्यस्य देशकालासंकोचेनोपपत्तेश्च । अपित्बद्धजीवयोर्व्या....त्वकथनमयुक्तमित्याशंक्याह अत्रेति । नियाम्यसंकोचपरत्वे बाधकमाह अप्राप्यत्ववशादिति । अचेतने बद्धचेतने च कैवल्यार्थिप्राप्यत्वाप्रसक्तेर्यं प्राप्य न निवर्तन्त इत्यपुनरावृत्तिरूपप्राप्तिविषयत्वेन उक्तस्य परमधामशब्दार्थतया परमदं क्वचिद्बद्धव्यावर्तकत्वेन वक्तव्यमिति भावः । अपुनरावृत्तेर्मूल त्वाएवोक्तत्वात्तच्चापुनरावृत्तिरूपमिति वाक्यं विफलमित्याशंक्य अपुनरावृत्तिर्नसम्भवतीति शंका परिहारार्थमित्याशयेन शंकां तावदाह यदिमुक्तोपीति च शब्दश्शंकानिवृत्ताविति तात्पर्यम् । नहि प्रतिज्ञामात्रेवार्थ सिद्धिरित्याशंक्य परिहाराभिप्रायमाह । अयंभाव इति । प्रक्षयादिति कैवल्यनित्यत्वपक्षेनिश्शेषप्रकृतिसम्बन्ध निवृत्तेरित्यर्थः । प्राकृतकैवल्यपक्षेप्रकृति भोगव्यापककर्माणां निश्शेषनिवृत्तेरित्यर्थः । नमुक्तस्येति । मुक्तपदं प्रकृतिवियोग प्रापककर्मनिवृत्तिपरं, निश्शेष प्रकृतिसम्बन्धनिवृत्तिपरं वा संसारगन्ध इति । संसारपदं प्रकृतिभोगपरं प्रकृतिसम्बन्धपरं वा सामाग्र्या अनादि सिद्धत्वात् । प्रतिबन्धकत्वस्यासत्वाच्च । आत्मानुभवरूपनिरतिशयानन्द एव भवति न तु प्रकृतिभोगः प्रकृतिसम्बन्धो वेत्यर्थः । च शब्दस्समुच्चयपर इत्यभिप्रायेणाह यद्वेति । अनावृत्तिशब्दादिति न्यायेन भगवत्प्राप्तिवत् केवलाधिकारिणस्स्वात्मप्राप्तिरप्यपुनरावृत्तिरूपेति प्रतिबद्यभिप्रायेण भगवत्स्स्वरूपात्मकप्राप्यसमुच्चय परंश्शब्द इति भावः । तथा च निश्शेषप्रकृति भोग

तत्सम्बन्धनिवर्तनेन स्वात्मानुभवरूपनिरतिशयानन्द प्रापणलक्षणोत्कृष्ट नियमन विषयत्वात् । यं प्राप्यननिवर्तन्त इति मूलान्वयोभिप्रेत इति भावः । धामशब्दस्य तेजः परत्वे स्वसजातीयप्रकाशान्तरनिरपेक्षव्यवहारानुगुण्य

मादायज्ञानलक्षणाप्रसङ्गात् स्थानपरत्वे तद्विरहाच्च । द्वितीययोजनानुत्थितिमाशंक्य पूर्वापरितोषमाह नियमनस्थानमितीति । ज्ञानलक्षणामूलभूतानुपपत्तिमाह अस्त्विति । आत्मस्वरूपस्य शुक्लभास्वररूपविलक्षणतेजस्वानुपपत्तेरिति भावः । धामपदस्यापरिच्छिन्नज्ञानलक्षणायां परममिदमिति विशेषणवैफल्यमाशंक्याह विशेषणफलितमिति धामपदेन ज्ञानलाक्षणिकेन स्वसजातीयानपेक्षव्यवहारानुगुण्यरूपप्रकाशवत्वं लभ्यते । तत्र च धर्मद्वारकप्रकाशवत्वस्यापिलाभेन अत्र पारम्यविशेषणे निश्शेषज्ञानसंकोचक निवृत्ति प्रयुक्तापरिच्छिन्नज्ञानविकासवत्वं फलितमिति भावः । धामशब्दस्याधिष्ठेयरूपस्थानपरत्वे ममेत्यस्याधिष्टात्रृतयाप्रतियोगित्वेनान्वयस्सम्भवति । ज्ञानपरत्वे तु ममज्ञानमित्यनन्वय इत्यत आह प्रकाशपक्ष इति । परमंधामेत्यनेन अपरिच्छिन्नज्ञानविकासशालित्वलाभेन तस्यस्वाभाविकतया निश्शेषज्ञान -संकोचनिवृत्तौ विच्छेदशंकाया असम्भवात्, प्रकाशपक्षे परमं धामेत्यनेनैव यं प्राप्य न निवर्तन्त इत्यत्रहेतुसिद्धया ममेति हेतुविशेषणं व्यर्थमित्याशंक्य शेषत्वस्य षष्ठ्यर्थत्वाङ्गीकारेणापरिच्छिन्नज्ञानविकास शालीमच्छेषभूत इत्युक्तौ भगवता स्वार्थं स्वाभाविकापरिच्छिन्नज्ञानविकासस्य निश्शेषज्ञानसंकोचकनिवृत्तिपूर्वकं करणे पुनर्ज्ञानसंकोचेन भगवत्संकल्पान्न सम्भवत्येवेति हेत्वन्तरं लभ्यत इति परिहारमभिप्रेत्यमच्छेषभूतमिति वाक्यार्थ इत्युक्तम् । अत एव सामान्येनोक्तस्य शेषत्वस्य मुक्तविषये विशेष्योक्तिरित्यभिप्रायेणाह यद्यपीत्यादिना, एवं सम्प्रदाय चन्द्रिकायां अव्यक्तोऽक्षर इत्युक्त इति वाक्यभाष्योपादानेन येत्वक्षरमित्यादिद्वादशाध्यायवाक्यभाष्यमपि केवलस्यमोक्षरूपत्वसाधकमिति सूचितम् । तत्रतावदिदं प्रकृतापेक्षितं गीता वाक्यम् । येत्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । ते प्राप्नुवन्ति मामेव सर्वभूतहितेरता इति । अत्रेयं भाष्यसूक्तिः । येत्वक्षरं प्रत्यगात्मस्वरूपम् । अनिर्देश्यं देहादन्यतया देवादि शब्दानिर्देश्यं । तत एव चक्षुरादिकरणाव्यक्तमुपासते । तेपि मां प्राप्नुवन्त्येव । मत्समानाकारं संसारिणमात्मानं प्राप्नुवन्त्येवेत्यर्थः । ममसाधर्म्यमागता इति हि वक्ष्यते इति च यत्तात्पर्यचन्द्रिकासूक्तिरूपयुक्तांशे प्रदर्श्यते । अक्षरनिष्ठस्यापकर्षमाह येत्वक्षरमिति श्लोकत्रयेण एवं सतत युक्तायेभक्तास्त्वां पर्युपासते

। येचाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः इति प्राणवाक्ये जिज्ञासप्राप्य स्याक्षरशब्देन निर्देशात् । येत्वक्षरमित्याद्युत्तरवाक्येपि तथा निर्देशात् । मां प्राप्नुवन्तीत्यस्य मत्समानाकारं संसारिणमात्मानं प्राप्नुवन्तीत्यर्थकथनाच्च । जिज्ञासु प्राप्यकैवल्यस्य मोक्षरूपत्वसिद्धिरित्यनुसन्धेयम् । एवं भाष्यसूक्तिबलादपि कैवल्यस्य जिज्ञासुप्राप्यत्वं भाष्यसूक्तिसिद्धमिति संप्रदाय चन्द्रिकायां प्रदर्शितम् । इयं तावत्सूक्तिः । अथ कैवल्यार्थिनां स्मरणप्रकारमाह । अथ कैवल्यं प्राप्तानां पुनरावृत्तिर्नविद्यत इत्याह अतः परमध्यायशेषेण । ज्ञानिनः कैवल्यार्थिनश्च पुनरावृत्तिमैश्वर्यार्थिनः पुनरावृत्तिं चाहेत्यादिषु प्रकृति विनिर्मुक्तात्मस्वरूप प्राप्तिप्रतिपादक पद्यावतारिकासु कैवल्यपदप्रयोगदर्शनात् । प्रकृति विनिर्मुक्तात्मस्वरूपाप्राप्तिः कथं कैवल्यतया ज्ञातेति न शंकनीयमिति । अत्र जिज्ञासोः प्रकृत विनुर्मुक्तात्मस्वरूपावाप्तौ सत्यामपि सा कैवल्यशब्दार्थो न भवति । तस्यार्चिरादिगतेः प्राक् तन्मध्ये वा प्रकृतिभोगराहित्येन निरतिशयानन्दात्मानुभवरूपकैवल्याभ्युपगमात् । अथवा भूमविद्यान्तर्गतप्राणविद्या निष्ठस्य आत्मानुभव एव कैवल्यम् । कैवल्यं भगवन्तं चेत्यादिषु

भावप्राप्तिराहित्येनैव कैवल्यस्य पृथङ्निर्देशात् । तस्मादचिन्मित्रं केवलं वाचिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन वा य उपासत इति भूमविद्यान्तर्गत ब्रह्मदृष्टिरहितप्राण विद्यानिष्ठे केवलात्मोपासकत्वस्य श्रीभाष्यसूक्तौ व्याहृतत्वाच्चा जिज्ञासुप्राप्ये कैवल्यशब्दस्य श्रीभाष्यसारदीपेषु क्वापि व्यवहारा दर्शनाच्च । प्राणविदेवकेवलः न तु पञ्चाग्नि विजिज्ञासुरिति शंकाभिप्रायः । इत्यादिष्वित्यादि शब्देन एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्यानुगुणं भगवदुपासनप्रकाश उक्त इति, यदक्षरं वेदविदोवदन्तीत्यादि तद्धामपरमं ममेतिश्लोकव्याख्यानसमाप्तिरस्वभाष्यवाक्यं गृह्यते । एवमार्तो जिज्ञासुरर्थार्थीत्यत्र ज्ञानशब्दार्थकथनावसरे प्रकृतिवियुक्त केवलात्मन्यपर्यवस्यन्निति भाष्यवाक्यमपि गृह्यते । प्राणविद्यानिष्ठात्मानुभवः, कैवल्यं भगवन्तं चेत्यादिषु कैवल्यशब्दार्थो न भवति । ऐह लौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकमित्यैहिकामुष्मिकभेदभिन्नैश्वर्यान्तर्भावात् प्राणविदनुभवस्य तस्मादचिन्मिश्रमित्यादि भाष्यसूक्तौ केवलशब्दः उपासने अचिद्वियोगपरः । न तु वस्तुतः प्रकृति वियुक्तस्यात्मनो भोगे प्रकृति भोगराहित्यरूपमुख्यकैवल्यपरः । अचिन्मिश्रं केवलंवाचिद्वस्तूपासत इति क्वचिद्विशिष्टवेषेणोपासनस्य तद्राहित्यवेषेणोपासनस्य च प्रतिपादनात् श्रीभाष्यादिषु पञ्चाग्निविद्यानिष्ठोपास्ये केवलशब्दाप्रयोगः तत्प्राप्यानुभवे कैवल्यशब्दाप्रयोगश्च न दोषः । अनुचितमविरुद्धमन्यतो ग्राह्यमिति न्यायेन श्रीमद्गीताभाष्यसूक्तिपञ्चके पञ्चाग्निविद्यानिष्ठ जिज्ञासुप्राप्यात्मवस्तुनि केवलशब्दस्य तत्राप्यानुभवे कैवल्यशब्द प्रयोगस्य च दर्शनेन श्रीभाष्यादिष्वपि तस्याभिप्रेतत्वोपपत्तेरिति परिहाराभिप्रायः । पद्यावतारिकास्वित्यवतारिका शब्दः । एवमैश्वर्यार्थिन इत्यादि पूर्वोक्तोपसंहारवाक्यस्य प्रकृतिवियुक्त केवलात्मन्यपर्यवस्यन्नित्यस्यचोपलक्षणमित्यनुसन्धेयम् । इत्थमार्तोजिज्ञासुरित्यादि श्लोकभाष्यस्वारस्याषृकेन अक्षरं ब्रह्मपरमिति गीतास्थाक्षरशब्द स्वारस्येन यदक्षरमित्यादि श्लोके तत्ते पदमिति प्रकृताक्षरसदृशमुक्तस्वरूपपरतच्छब्दबलेन अव्यक्ताक्षर इत्युक्त इति जीवपरत्वे न निश्चिताक्षरशब्दोपादानेन येचाप्यक्षरमव्यक्तं तेषां के योगवित्तमा इति द्वादशाध्यायप्रश्नवाक्यस्थ जिज्ञासूपास्यविषयादक्षरशब्दबलेन येत्वक्षरमनिर्देश्यमिति तदुत्तरवाक्यस्थाक्षरशब्दबलेन च, ऐश्वर्याक्षरधात्म्य भगवच्चरणार्थिनां, संस्कृत्यक्षरवैष्णवाध्वस्विति यामुनाचार्यसूक्तिद्वयबलेन मुक्तस्वरूपपरत्वेनोदाहृत गीतास्थाक्षरशब्दचतुष्टयव्याख्यानभाष्यबलेन, सयातिपरांगतिं, तमाहुः परमां गतिमिति परमगतिशब्दद्वयस्वारस्येन तद्व्याख्यानभाष्यसूक्तिद्वयबलेन, येत्वक्षरमित्यादिप्रकरणे ते प्राप्नुवन्ति मामेवेति वाक्यभाष्यसूक्तिबलेन च जिज्ञासु रूपकैवल्यार्थि प्राप्यमुक्तजीवस्वरूपमिति कैवल्यं मोक्ष एवेति सम्प्रदायचन्द्रिका तात्पर्यनिष्कर्ष इति सिद्धम् । एवं स्वात्मानुभूतिरितियाकिलमुक्तिरुक्ता । इति श्रीवत्सांकमिश्रसूक्तिः ऐश्वर्यमक्षरगतिं परमं पदं वा इति श्रीपराशरभट्टार्यसूक्तिश्च कैवल्यस्य मोक्षरूपत्वे प्रमाणमिति संप्रदायचन्द्रिकायां तत्सूक्तिद्वयोपादानेन गम्यते । तत्र प्रथम श्लोके मुक्तिशब्द प्रसिद्धिस्वारस्यं विवक्षितम् । द्वितीयश्लोके अक्षरगतिशब्देनाक्षररूपप्राप्योक्ता जिज्ञासु प्राप्यस्य कैवल्यस्य नाशाभावकथनेन मोक्षरूपत्वमभिप्रेतम् । तस्मात्संप्रदायचन्द्रिकायां बहुप्रमाणोपपत्तिसम्प्रदायैः कैवल्यस्य मोक्षरूपत्वसमर्थनात् । रहस्यविवेके सर्वबन्धविनिर्मोकेपि मोक्षभेदस्य त्रेधासमर्थनात् । न्यायसिद्धाञ्जने कैवल्यं मोक्ष इति पक्षस्य बहुधासूचनात् । तात्पर्यचन्द्रिकायामित्येषादिगितिदिक्प्रदर्शनेन तत्पक्षसूचनाच्च । चरमश्लोकाधिकारे कैवल्यस्य मोक्षरूपत्वे ब्रह्मानुभवेन विना अवस्थानं न घटत इत्यहृदयोक्तिरिति सिद्धम् । एतेनाचिद्ब्रह्मानुभवाभावात् स्वात्ममात्रानुभवे

कैवल्यशब्दप्रयोगश्चरमश्लोकाधिकारवाक्यपूर्वपक्षाभिप्रायवैभववादादिरविरोधोनेय इति श्रुतप्रकाशिकोक्तरीत्या मिथो विरोधे दुष्परिहारेयुक्तियुक्तं ग्राह्यमिति न दोष इति श्रुत प्रकाशिकोक्तरीत्या च कैवल्यानित्यत्वपक्षस्यान्वरुह्यवाद इति सिद्धम् । न्यायसिद्धाञ्जने बहुधा पक्षान्तरसूचनात् । तात्पर्यचन्द्रिकायां दिक् प्रदर्शनेन तत्सूचनाच्च पूर्वोक्तरीत्याकैवल्य नित्यत्वपक्षस्यैव ग्राह्यत्वाच्च। किञ्च कैवल्य शब्दस्याचिदनुभवाभावपरत्वे कैवल्यार्थि प्राप्यस्य सर्वबन्धविनिर्मोक वाच्याक्षरशब्देन निर्दोषो न घटते । जिज्ञासुः प्रकृति वियुक्तात्मस्वरूपावाप्तीच्छुः प्रकृतिवियुक्त केवलात्मन्यपर्यवस्यन् तमाहुः परमांगतिं सयाति परमांगतिम् । प्रकृति वियुक्तं मत्समानाकारमपुनरावृत्तिमात्मानं प्राप्नोतीत्यर्थः । तेप्राप्नुवन्ति मामेव, मत्समानाकारमसंसारिणमात्मानं प्राप्नुवन्तीत्यर्थ इत्यादि निश्शेष प्रकृति सम्बन्धाभावपरभाष्यसूक्तिविरोधाच्च, निश्शेषात्मानुभवविरोधिरूपवस्तुराहित्यपरत्वं विनावस्तुतः प्रकृति सम्बद्धे प्रकृतिभोगाभावमादाय कैवल्यशब्दोक्तेः परिभाषिकत्वापत्तेः । अचिद्राहित्यापेक्षया अचिदनुभवराहित्यस्य कैवल्यशब्दार्थत्वे प्रवृत्तिनिमित्तगौरवापत्तेश्च । आत्मभोग विरोधिनिवृत्तिपरत्वाभावे केवलशब्दप्रवृत्तिनिमित्तसंकोचापत्तेश्च । केवलशब्दस्य ब्रह्मानुभवाभावपरत्वमप्ययुक्तम् । ब्रह्मानुभवस्य परमपुरुषार्थत्वेन तद्राहित्यस्य जिज्ञासुप्राप्यरूप कैवल्यशब्दार्थत्वानुपपत्तेः । निरतिशयसुखाभावस्यापुरुषार्थत्वात् । अत एव सर्वेच्यवन धर्माण इति निन्दा वाक्ये ब्रह्मानुभवाच्च्यवनं च्यवनशब्दार्थ इति तात्पर्यचन्द्रिकायामनुगृहीतं । यदप्युक्तं चरमश्लोकाधिकारे स्वात्मानुभूतिरिति याकिलमुक्तिरुक्ता । मुक्तानां परमांगतिः इत्यादिषु कैवल्याधिकारिविषये मुक्तिवाचकशब्दोपि विगतेच्छाभयक्रोधो यस्सदामुक्त एव सः । प्रवसित इव गेहे वर्तते यस्समुक्त, इत्यादिष्विव प्रसिद्धप्रबलमुक्ति विरोधिनिवृत्तिपरत्वमादाय मुक्तप्रायत्वपरत्वेन निर्वाह्य इति । तत्रापि पक्षान्तरमुपन्यस्तवतां वेदान्ताचार्याणामयमपरितोषोभिप्रेतः भोगा इमे विधिशिवादि पदं च किञ्च स्वात्मानुभूतिरिति याकिलमुक्तिरुक्त्वा । सर्वं तदूषजलदोषमहं जुषेयहस्त्यद्रिनाथतवदास्यमर्हारसज्ञ इति श्रीवत्सांकमिश्रसूक्तौतावत् मुक्तिशब्दस्य सर्वबन्धविनिर्मोकरूपयोगार्था संकोचसम्भवे तत्संकोचकल्पनमन्याय्यम् । मुक्तिः कैवल्यनिर्वाण श्रेयोनिश्रेयसामृतमिति सर्वबन्धविनिर्मोकरूप असंकुचितार्थे मुक्तिशब्दस्य

निघण्टुप्रसिद्धिविरोधश्च मुक्तोपनृप्यव्यपदेशात् । मुक्तः प्रतिज्ञानात् ।। इत्यादि सौत्रप्रयोगविरोधश्च । अपि च ऐहलौकिकमैश्वर्यं इत्यादि श्लोके प्राकृतसर्वभोगापेक्षया कैवल्यस्य पृथगुपादानवत् । भोगा इमे विधिशिवादिपदंचेत्यैहिकामुष्मिकसर्वफलमभिधाय किञ्चस्वात्मानु भूतिरितिकैवल्यस्य पृथगुपादानान्मुक्तिशब्दस्सर्वबन्धविनिर्मोकपर एव । अन्यधायाकिलमुक्तिरुक्तेति यच्छब्देन स्वात्मानुभूतेः मुक्तित्वप्रसिद्धयुक्ति विरोधश्च । सर्वन्तदूषजलजोषमित्याद्युत्तरार्धे आत्मानुभूतेर्मुक्तित्वसिद्धवत्कारेण साक्षान्मुक्तिरूपभगवत्प्राप्तिव्यावर्तकतया

दास्यमहारसाभावेन उषजलवद्वरस्य कैवल्ये प्रतिपादनेन कैवल्यस्य सर्वबन्धविनिर्मोकरूपमुक्तिरूपत्वाभावे दास्यमहारसाभावेन उषजलवद्दुःखावहारसवत्वेन च साक्षान्मुक्ति व्यावृत्तिकथनस्य अप्रसक्तप्रतिषेधत्वप्रसङ्गेन न च सर्वबन्धविनिर्मोक एव मुक्तिशब्दार्थः । अन्यच्च महच्छब्देन पूर्वोक्तरीत्यास्वरूपरूपगुणविभूतिभिः रसशब्दत भोग्यापरिच्छेदोऽभिप्रेतः । अतोपि कैवल्यस्य मुक्तिरूपत्वसिद्धिः अनुगृहीतञ्च सम्प्रदायचन्द्रिकायां कैवल्यस्यसाक्षान्मुक्ति वैषम्यकथनावसरे । न च प्रकारान्तरेण केवलपरमपुरुषनिष्ठ योस्साम्याभ्युपगमे कथमन्यतरस्यानुत्कृष्टत्वमवगतमिति वाच्यम् । दास्यस्य स्वाम्यनुभवजनितानन्दातिशयवत्वस्य

स्वरूपानुरूपत्वेन तादृशानन्दस्याभावात् । अत एव श्रीवत्सांकमिश्रैरपि भोगा इमे इत्यादि श्लोके दास्याननुगुणत्वेन कैवल्यस्यासारत्वं प्रतिपादितमिति अत्र शंकावाक्ये साम्याभ्युपगम इत्यन्तेन भोग्यल्पत्वबहुत्वरूपवैषम्यसद्भावेपि भोगस्वरूपतरतम्यराहित्यरूपप्रकारान्तरेण साम्याभ्युपगमेपीति विवक्षितम् । केवलेति । केवलश्च परमपुरुषनिष्ठश्च केवलपरमपुरुषनिष्ठ तदुभयागतानन्दयोरित्यर्थः । अन्यतरस्येति केवलपरमपुरुषनिष्ठयोरन्यतरस्य । केवलस्येत्यर्थः । ब्रह्मस्वरूपतद्गुणादीनां केवलाधिकार्यपेक्षया मुक्तभोग्यत्वेन स्वस्वभोग्यपूर्तेरुभयत्राप्यविशेषण केवलस्यानुत्कृष्टत्वं ज्ञानिभोग्यापेक्षया जिज्ञासुभोग्याल्पत्वेनापकृषृत्वपरिभाषायां लोके स्वस्वरूपगुणाद्यपेक्षया परस्वरूप गुणादेर्भोग्यत्वातिशया दर्शनेन ब्रह्मस्वरूपगुणानां भोग्यतांशे स्वस्वरूपापेक्षया अपकृष्टत्वप्रसङ्गादिति भावः । मूलमन्त्रमन्त्ररत्नादौ निष्कृष्ट जीवस्वरूपसामान्यस्य भगवत्प्रतीति प्रधानोद्देश्यक व्यापारार्हत्व स्वप्रीति प्रधानोद्देश्यकव्यापारानर्हत्वयोस्सङ्ग्रह विस्तराभ्यां प्रपञ्चितत्वेनन्यार्थ भगवन्प्रीत्युद्देश्यक प्रवृत्तेः ।

भगवत्प्रियतमत्वस्यानन्यार्थस्वप्रीत्युद्देशक स्वप्रवृत्ति मात्रे भगवदप्रियत्वस्य च सदृढप्रमाणसिद्धतया अनवधिकातिशयप्रीतिकारितशेषवृत्तिरूपतादृश व्यापारफलोपहित तादृशव्यापारार्हत्वरूपशक्ति विशेषस्य तादृशफलप्राप्यत्वेन तद्व्यापकीभूत तादृशफलोपधानमूलभूतनिरतिशयानन्दस्यापि तादृशशक्तिविशेषव्यापकत्व लक्षणदास्यानुगुण्यसद्भावेन स्वप्रीतिमात्रोद्देश्यक प्रवृत्तिमति केवलात्मनि भगवत्प्रियतमानन्दाभावेन परमपुरुषनिष्टापेक्षया कैवल्यस्योत्कृष्टत्वं न सम्भवतीत्यभिप्रायेण परिहरति दासस्येति । एतेन मूलमन्त्रादि जनितस्वरूपयाथात्म्यज्ञानवतो भगवदिष्टत्वस्यैस्वेष्टतावच्छेदकतया स्वस्वरूप गुणाद्यपेक्षया भगवत्स्वरूपगुणादिकमेवातिशयित भोग्यमिति । न जीवस्वरूपापेक्षया भगवत्स्वरूपादेर्भोग्यत्वांशे अपकृष्टत्वप्रसङ्गावकाश इत्यपि सूचितम् । भोगा इमे इत्यादि सूक्तौ दास्य महारसज्ञ इत्यत्रमहच्छब्देन भगवत्प्रियतमत्वेन रसशब्दते भगवद्दास्ये अपरिमित भोग्यानुभवकारित्व पूर्वोक्त स्वरूपानुगुणत्वादिकमभिप्रेत्यमित्याशयेन संवादमाह । अत एवेति । यत्तदोर्नित्य सम्बन्धात् । य इमे भोगाः यच्चविधि शिवादिपदं यचमुक्तिः । सर्वं तदित्यन्वयः । ते च तच्च साचेति तत्सर्वमित्यर्थः नपुंसकमनपुंसकेनेत्येकशेष एकवद्भावश्च । अत्र यच्छब्दस्ययाकिलेत्येकत्र विशिष्योपादानां स्वात्मानुभूतेर्मुक्तित्व प्रसिद्धिद्योतनायेत्युक्तम् । उषजलदोषं उषोलवणभूमिः तद्युक्तजलरसानुभवं कुर्वीश्चेत्यर्थः । जलजोषमिति णमुलन्तप्रयोगः । मारत्यद्रिनाथ इत्यनेन अवशाः प्रतिपेदिर इति न्यायेन दिव्यमङ्गलविग्रहवैलक्ष्यण्यादि प्रदर्शनेन अस्मदीय शेषवृत्ति स्वीकारार्थमर्चावतार परिगृहात् दास्यं भगवदत्यन्ताभिमतमिति सूच्यते । तस्मात्साक्षान्मुक्तोक्तेः कैवल्यमुक्त्यपेक्षयादास्यमहारसमादायोत्कृष्टत्वस्य कैवल्यमुक्तेर्निकृष्टत्वस्य च आचार्यानुगृहीतत्वात् । सर्वबन्धविनिर्मोक रूपत्वमुभयत्राविशिष्टमिति सिद्धम् । एवं मुक्तानां परमागतिरिति श्रीसहस्रनामपाठे कैवल्यरूपमुक्तगतिव्यावर्तक परमशब्दोपादानबलात्कैवल्यस्य मुक्तगतित्वाभ्युपगमेन तद्व्यावर्तकतया परमशब्दोपादानमिति विरजापरमव्योम्नोरन्तरा केवलं स्मृतमिति वचनस्मारक तद्भाष्यसूक्तिबलाच्च कैवल्यं मोक्ष इति पूर्वमेवोक्तम् । अतो मुक्तशब्दस्य मुक्तप्रायत्वपरत्वेनागतिकगतिभूत निर्वाहानयुक्तः । यदपि चोक्तं चरमश्लोकाधिकारे जरामरण मोक्षायेति व्यपदेशोपि देवानाममरत्वव्यपदेशवदापेक्षिकः । क्रमेण मुक्तिपर्यन्त

फलमपेक्ष्य तथाव्यपदेश इति वा सम्भवतीत्युक्तमिति । तदप्ययुक्तं । तदुक्तेरपि प्राकृतकैवल्यपक्षमभ्युपगम्य तत्पक्षे जरामरणायेति श्लोकार्थोपपादनपरत्वात् । अत्रापि

नाशस्सामान्य वाचि, मरण शब्दस्य नाशविशेषपरत्वे अस्वारस्यं । प्रकृति वियुक्तात्मस्वरूपदर्शनायेति तद्भाष्यास्वारस्यं च तद्वारकफलफलत्वे साक्षात्फलपरत्वास्वारस्यमिति पूर्वमेवोक्तम् । इदमेवाप्राकृतकैवल्यपक्षोपन्यासहेतुभूतपूर्वापरितोषकत्वेन वेदान्ताचार्याभिप्रेतम् । तदेतत्सर्वमभिसन्धायरहस्य विवेके विस्तरेणानुगृहीतं । इयं तावत्तत्सूक्तिः ।

ननु सोव्यात्ममात्रानुभवहेतुः पराभिध्यानादित्यादि सूत्रोक्त उपासनान्युगुणपलप्रसाधकभगवत्संकल्पः । स तु देहयोगाद्वासोपीत्युक्त प्रकारेण देहादिमूलकश्चेत् मोक्षोनस्यादिति चेत् । आत्मानुभव प्रतिबन्धकसकलकर्मणां

तन्मूलकदेहसम्बन्धस्यपनाशात् । अयं मोक्ष इत्युक्तेर्नविरोधः । इदं भक्ति प्रष्टत्ति रूपपुण्यप्रसन्नं भगवदधीनस्वार्थानुभव कैंकर्ययोरपि समानं । तयोस्स्वस्वसाधनातिरिक्त स्वस्वविरोधिसकलकर्मक्षयोस्तीहीति चेत् । स आत्मानुभवस्यापि समासः । आत्मानुभवस्स्वतः प्राप्तो न भवति प्राप्तो न भवति हीतिचेत् । स्वार्थभगवदनुभव तत्कैंकर्ये अप्यहंकार ममकारगर्भत्वात् । किंकरस्य स्वतः प्राप्ते न भवतः । ज्ञानहेतु परमावकाश प्राप्यातावपि नश्यतइतिचेत् सोव्याप्तानुभवस्यापि समानः । आत्मानुभवनाशः भगवदनुबुभूषयोपारानेनेति चेत् । भगवदनुभव कैंकर्ययोस्स्वार्थतानिवृत्तिरपि तथेति वक्तुं शक्यं । तत्र तथोस्स्वार्थतानिवृत्तिः प्रायाश्चित्त पुरुषकारजन्य भगवत्कृपयेति चेत् । आत्मानुभव ऐश्वर्यकामना कृपया नश्येत् । न चानन्त्याय कल्पते । सर्वं हपश्यः पश्यति । छायावासत्वमनुगच्छेत् । किंकरा ममते नित्यमित्याद्युक्ताविभविद्रष्टुत्वपारतन्त्र्य कैंकर्याव्यापि तया भगवत्कृपया ऐश्वर्य कैवल्यार्थिनोरपिस्युः । तत्क्रतुन्यायात्तानितयोर्नसन्तीति चेत् । तदुपायान्तरनिष्ठस्वप्रयोजन परयोरपि समानं । तथापि स्वार्थभगवदनुभवकैंकर्योमोक्ष इति चेत् । आत्मानुभवोपि मुक्तिरेव । स्वात्मानुभूतिरिति याकिलमुक्तिः, जरामरणमोक्षायेति वचनयोरन्यथाकरणमयुक्तमिति । अत्रायमभिप्रायोनुसन्धेयः । प्रत्युत विरोधिनः परमात्मशरीरत्वेन स्वात्मानुभवद्देतोस्स्वोच्चतादृशात्मानुभवमात्र मन्त्रेण भगवदनुभव प्रसङ्गो न घटत इति पूर्ववाक्ये ब्रह्मानुभवप्रतिबन्धकः कैवल्यानुभव हेतुरित्ययुक्तं ।

पराभिध्यानादिति सूत्रे भगलत्संकल्पस्य जीवगतस्वरूपाविर्भावप्रतिबन्धकत्वेनोक्ततया तत्प्रतिबन्धकत्वस्य देहयोगाद्वासोपीति सूत्रे सूक्ष्मस्थूलदेहसम्बन्ध प्रयुक्तत्वेनोक्त तया च तादृश भगवत्संकल्प विशेषहेतुभूत स्वात्मानुभव हेतोर्भगवत्प्राप्ति विरोधित्वस्य देहसम्बन्ध साहित्येनैव वक्तव्यत्वात् केवलाधिकारिणस्सर्व बन्ध विनिर्मोकरूप मोक्षो नसम्भवतीति शंकते । नत्विति । सोपीति तच्छब्देन ब्रह्मशरीरत्वेन स्वात्मानुभव हेतोर्बह्मप्राप्ति विरोधित्वं पूर्ववाक्योक्तं परामृश्यते । उपासनानुगुणेफल प्रसाधकेति सामान्य शब्देन कैवल्यार्थ विषये स्वात्मप्रधानकोपासनानुगुण स्वात्मप्रधानकानुभवरूपफलसम्पादकः आत्ममात्रानुभवन्दद्यामिति भगवत्संकल्पो विवक्षितः । ततः किमिन्यत्राहसत्विति । तु शब्दश्शंकाव्यावृत्यर्थः । देहादित्यादिशब्देन सूक्ष्माचिच्छक्तियोगाद्वेतिभाष्योक्तं गृह्यते । पराभिध्यानात्तुतिरोहितमित्यत्र जीवस्य स्वाप्नपदार्थ स्रष्टुत्वासम्भवहेतुतयायाकत्स्नेनानभिव्यक्त स्वरूपत्वादित्युक्तौ कथं स्वरूपानभिव्यक्तिरित्या काङ्क्षायां पराभिध्यानात्तुतिरोहितमिति स्वरूप तिरोधानहेतुत्वेन भगवत्संकल्पस्योक्ततया देह योगाद्वैत्यत्र तादृशभगवत्संकल्पस्यदेहयोगाधीनत्वोक्तावपि सर्वबन्धविनिर्मुक्ते केवलाधिकारिणीयावदात्मभावि भगवत्प्राप्तिर्नस्यादिति भगवत्संकल्पस्य जीवप्रधानकोपासनस्य तादृशोपासनानुगुण जीवमात्रानि भवसाधकस्य सम्भवेन तस्यस्वरूपतिरोधकल्पविशेषात्

ब्रह्मानुभवानन्दप्रतिबन्धश्च सम्भवतीति विपर्यये पर्यवसानमाह स इति । तर्हीत्यादौ पूरणीयं । केवलस्वात्मानु भवोद्देश्यक स्वात्मप्रधानकोपासनस्यानन्यार्हशेषत्वलक्षण स्वरूपनिरोधित्वेन तदधीन भगवत्सकंल्पविशेषात् भगवदनुभव कैंकर्य लक्षणस्वरूपानुरूपफलप्रतिबन्धस्सम्भवतीति तटस्थं शंकते । आत्मानुभव इति । स्वतस्वरूपानुरूपसाधनत इत्यर्थः स्वाभाविको न भवतीति तु नार्थः आत्मानुभवस्यापि स्वाभाविकत्वात् । स्वार्थपरार्थसाधारण्येन भगवदनुग्रह कैंकर्ययोस्स्वरूपानुरूपत्वात् तत्प्रतिबन्धक भगवत्संकल्पो न सम्भवतीति तृष्टान्तासम्भव इति भावः । भगवत्प्रतीतिमात्र प्रधानोद्देश्यकानुभव कैंकर्य एव स्वरूपानुरूपेस्वस्यापिनार्हन्त इत्यनुगृहीतरीत्या स्वप्रीतिभगवत् प्रीत्युभयप्रधानोद्देश्यकानुभव कैंकर्ययोर्नमःशब्द निषिद्धत्वात् । न च सोश्नुते सर्वान्कामाने तत्सामगायन्नान्ते इत्यादिषु स्वार्थपरार्थ साधारण्येन अनुभव कैंकर्ययोर्विद्याप्रधानफलत्वश्रुतिविरोधः । तयोः केवलपरार्थत्व प्रतिपादकमूलमन्त्र विरोधेन केवलपरार्थत्वानुक्तिमात्रेण सोश्नुत इत्यादिषु

स्वार्थानुभवकैंकर्य साधारण फलपरत्वकल्पनायाः अनवाकाश पराहतत्वात् अतो दृष्टान्तस्सम्भवतीति अभिप्रायेणेह परिहरति स्वार्थेति । अहंकारेति । फलार्थभगवत्प्रसादसाधनं अहं करोमीत्यध्यवसायो अहंकारः । तादृशसाधनानुष्ठानप्रधानोद्देश्य भोगवानहमित्यध्यवसायो ममकार इति विवेकः तद्गर्भत्वं तद्घटितस्वसामग्रिकत्वं । किंकरस्य भगवत्प्रीतिमात्रोद्देश्यकशेषवृत्यर्हस्येत्यर्थः । स्वत इति पूर्ववत् । न भवत इति । तथा च पूर्वोक्त भगवत्संकल्पविशेषात् मूल तथातत्व ज्ञानानन्तरं केवलपरार्थानुभव कैंकर्येच्छया ब्रह्मोपासनेन भवतीत्यर्थः । इयां स्तु विशेषः । केवलान्मानुभवस्थले स्वात्मप्रधानकोपासनेन स्वात्मप्रधानकानुभवरूपफलप्राप्ता ब्रह्मप्रधानकोपासनेन कैवल्यानुभवनाशेसति ब्रह्मप्रधानकानुभवरूपफलप्राप्तिरिति पूर्वः पक्षः । उपायान्तर निष्ठस्वप्रयोजसपरयोः प्रथमं कर्मज्ञानभक्ति स्वकीयस्वीकारेषु स्वार्थानुभव कैंकर्यसाधनताभ्रमेणप्रवृत्तौ सत्यांरस्वरूपयार्थात्म्य ज्ञानेन भगवदनुभव

कैंकर्ययोः स्वार्थताबुद्धिनाशेसति भान्ति सिद्धानुभव कैंकर्यलक्षण फलप्राप्तिनैवसिद्धोपाय स्वीकारेण व्याजभूतकर्मज्ञानभक्ति प्रपत्तिभिश्च केवलपरार्थानुभव कैंकर्यलक्षणफलप्राप्तिरिति सिद्धान्तः । अत एव रहस्यात्रयमीमांसायां तृतीये प्रकरणे कर्मज्ञानभक्ति प्रपत्तिषु साधनताभ्रम निवृत्तौ तासां कैंकर्यस्वरूप प्रकाशप्राप्यरूचि स्वरूपयाथात्म्यज्ञानरूपव्याजन्तर्भावः । श्रीकृष्ण पादलोकाचार्यैरनुगृहीतः । अत एव च द्रमिडोपनिषद्भाष्ये द्वितीयशथकतृतीयशतक तुरीयगाधाव्याख्यानावसरे आत्मसमर्पणाकरणे सर्वमुक्ति प्रसङ्गः तत्करणे तदीयस्यत दानं स्यात्तर्हि किं कर्तव्यमिति चेत् भ्रान्तिदशायां समर्पणमपि कार्यं । तत्वज्ञानदशायामिति शयोपि कार्य इति भगवद्यामुनाचार्य सूक्तिद्वय संवादप्रदनेन श्रीकलिजीज्जगदाचार्यैरनुगृहीतमिति । अयं चार्थोऽत्राभिप्रेतः । इत्थं उपायान्तरनिष्ठस्वप्रयोजन परयोरिवस्वार्थानुभवकैंकर्यरूपस्वरूप विरुद्ध फलाभ्युपगमपक्षे तादृशफलसाधनानुष्ठानजनित भगवत्संकल्प विशेषात् कैवल्याधिकारिणि स्वरूपानुरूप भगवदनु भवानन्दफलोत्पत्तिः प्रतिबध्यते । तदनभ्युपगमपक्षेरूचिविशेषाधीन साधनानुष्ठानजनित भगवत्संकल्प विशेषात् । यावदात्मभाविजीवात्मस्वरूपप्रधानकानुभवानन्दरूप फलस्यैवोत्पत्या निश्शेषसंसारनिवृत्ति इच्छाबलात् तादृशमोक्षांशे कैवल्याधिकारिणस्स्वार्थानुभवकैंकर्यनिष्ठाभ्यां साम्यं न तु ब्रह्मानन्दानुभवाभावांशेपीति स्थितं । अथ स्वरूप विरुद्धसाधनानुष्ठानबलात्

स्वरूपानुरूपफलानुत्पत्तिरित्येतद्द्रढयितुं कैवल्याधिकारिणि हेत्वन्तरेण
ब्रह्मानुभवानन्दानुत्पत्तिमभिप्रेत्यशंकते । तत्र तयोरिति । तत्र
उपायान्तरनिष्ठस्वप्रयोजनपरयोरित्यर्थः । तयोः अनुभवकैंकर्ययोरित्यर्थः । स्वार्थतापदं स्वार्थता
बुद्धिपरं प्रायश्चित्तेति । त्रयाणामपिकर्म अनुभव विनाश्यं । चतुर्थाधिकारिणः प्रायश्चित्तविनाश्यं,
पञ्चमाधिकारिणः पुरुषकारविनाश्यमिति श्रीवचनभूषणसूत्रौ कर्मपदस्य स्वरूपानुरूपफलविरोधि
सामान्यपरत्वमत्राभिप्रेतं, भगवत्कृपयेति । तादृशकृपाभावात्केवलाधिकारिणि स्वरूपानुरूप
फलानुत्पत्तिरितिभावः । हेत्वसिद्ध्याभिप्रायेण प्रतिबन्द्योत्तरमाह आत्मानुभव इति ।
कृपयानश्येदिति । उपायान्तरनिष्ठस्वप्रयोजनपरयोः पूर्वोक्तः भगवत्कृपयास्वार्थानुभवकैंकर्येच्छायथा
नश्यति । तद्वदितिभावः । न स्वरूपविरुद्धफलेच्छानाशमात्रं अपि तु स्वरूपानुरूपफलेच्छया
स्वरूपानुरूपफल परम्परापिस्यादित्याह अविर्भावेति । आविर्भावः । अष्टगुणाविभातिः । द्रष्टुत्वं
सर्वसाक्षात्कत्रृत्वं छायावेत्यत्र वा शब्द इवार्थः । सत्वशब्दोव्यवसाय परः । तद्व्यावयप्रतिपन्नं
परप्रीतिमात्र प्रधानोद्देश्यक प्रवृत्तिविषयत्वार्हत्वाध्यवसाय लक्षणं फलांशे अचिद्वत्पराधीनत्व ज्ञानं
पारतन्त्र्य शब्दार्थः अनुगच्छेदिति । अर्हर्थे लिङ् प्रत्ययः । तद्वाक्यान्नि रुक्ताध्यवसायोभवतीति
भावः । तद्ज्ञानफलं भूततादृशप्रवृत्तिफलोपधानं कैंकर्य शब्दार्थः । तयेति । प्रायश्चित्त
पुरुषकारजन्ययेत्यर्थः । स्वात्ममात्रभोक्यतानुसन्धानरूपोपासनेन
स्वात्ममात्रानुभवानन्दरूपफलमेवजायते श्रुति, सूत्र, भाष्य, सिद्धान्ययोगव्यवच्छेदरूपतत्क्रतुन्यायेन
स्वात्मानुभवं दद्यां ब्रह्मानुभवानन्दं न दद्यामित्येव भगवत्संकल्पोन्नयनात् । तथा च
तादृशभगवत्संकल्पप्रतिबन्धात् ब्रह्मानुभवं दद्यामिति संकल्प रूपकारणाभावाच्च ऐश्वर्यकैवल्यार्थिनो
केवल परार्थ कैंकर्य पर्यन्तानि फलानि न जायन्ते । स्वात्मप्रधानकोपासनशालिनः
परार्थकैकंकर्यपर्यन्तफलेच्छाभावेन ऐश्वर्य कैवल्यप्राप्तिबन्दकप्रायश्चित्त प्रवृत्ति सम्भवात् ।
भगवत्संकल्पविरोधेन पुरुषाकार संकल्पासम्भवाच्च । प्रायश्चित्त पुरुषकाराभ्यामपि न
परार्थकैंकर्यपर्यन्त फलोत्पत्तिस्सम्भवतीति । यस्यतु जायमानकालभगवत्कटाक्षादि मुखेन परार्थ
कैंकर्य पर्यन्तफलाभिलाषः । तस्य प्रथमं ऐश्वर्यकैवल्यसाधनता प्रमापूर्वकतदुभयसाधनानुष्ठान
शालिनोपि पश्चाद्भगवत्कटाक्षाद्यधीन तादृशफलाभिलाषसहकृतत्वज्ञानविशेषेण ऐश्वर्य
कैवल्यरुचिविनाशेन प्रायश्चित्त पुरुषकाराभ्यां भक्तिप्रपत्तिरूपव्याजान्वयेन परार्थ

कैंकर्यपर्यन्त फललाभोऽस्त्येव । उपायान्तरनिष्ठ स्वप्रयोजन परयोस्तु स्वार्थानुभवकैंकर्यरूपफल
स्वरूपस्यैव मूलमन्त्रादि निषिद्धतया अप्रमाणिकत्वेन तादृशफलसाधनता भ्रमपूर्वकसाधनानुष्ठान
सत्वेपि नेहाभिक्रमनाशोस्तीत्याद्युक्तरीत्या क्रमेण तत्वज्ञानाधीनव्याजभक्तिप्रपत्यन्वयेन
परार्थानुभवकैंकर्य पर्यन्तफलमेव जायते । नत्व प्रामाणिकस्वार्थानुभव
कैंकर्यरूपफलोत्पत्तिरित्यभिप्रायेण प्रतिबन्दि पर्यवसानमाह तत्क्रतुन्यायादित्यादिना तानीति ।
आत्मानुभव ऐश्वर्यकामनाविनाशपूर्वकपरार्थानुभव कैंकर्यपर्यन्तफलानीत्यर्थः । तयोरिति । ऐश्वर्य
कैवल्यनिष्ठयोरित्यर्थः । तदिति । परार्थानुभवकैंकर्य पर्यन्तफलासत्वमित्यर्थः । उपायान्तरेति ।
उपायान्तर स्वप्रयोजनभ्रमदशायामिति शेषः । तद्भ्रमासत्वे व्याजभक्ति परगतस्वीकारान्वयेन
तत्वज्ञानसाध्यत्वेन प्रसिद्धमोक्षपूर्वक परार्थानुभव कैंकर्यपर्यन्त फलान्वयोस्तीतिभावः । पूर्वोक्तं
स्वार्थानुभव कैंकर्यरूपफलाभ्युपगमपक्षमाश्रित्य सर्वबन्ध विनिर्मोकेपि भगवत्संकल्प विशेषप्रतिबन्धात्

कैवल्याधिकारिणि ब्रह्मानुभवानन्दरूपफलानुत्पत्तिरिति प्रकृतार्थं साधयितुं प्रतिबन्द्या विपर्यये पर्यवसानं शंकापरिहार मुखेन निगमयति तथापीति । स्वरूपानुरूप फलत्वाभावेपीत्यर्थः । भगवत्संकल्प विशेष प्रतिबन्धात् परार्थानुभवकैंकर्यरूप स्वरूपानुरूपफलानुत्पत्यास्वार्थानुभवकैंकर्य भावान्तराभावन्यायेन सर्वबन्धविनिर्मोकरूपमोक्षा इत्याह । स्वार्थेति । स्वात्मप्रधानकोपासन जन्य भगवत्संकल्पविशेषेण प्रतिबन्धात् ब्रह्मानुभवानन्दरूपफलानुत्पत्तिसम्भवेनत्मानुभवनन्दोपि सर्वबन्धविनिर्मोकरूपमोक्ष एवैत्याहात्मानुभवोपीति । इत्थं कैवल्यस्य मोक्षत्वे ब्रह्मानुभव प्रसङ्गइति बाधकं परिहृत्य श्रीवत्सांकमिश्रश्रीगीताचार्यसूक्तिरूपसाधक प्रमाणद्वयान्यथासिद्धिं परिहरति । स्वात्मानुभूतिरिति । अयुक्तमिति । पूर्वोक्तरीत्या तयोरन्यथाकरणं स्वरूपव्याक्रियानिराकृतमिति भावः । किन्तु जरामरणमोक्षयेत्यत्र षड्भावविकारेष्वपक्षय विनाशरूप पञ्चमष्ठविकारपरौ । अन्यथा निर्जरत्वादमरत्वाच्च प्रकृति भोगपराणान्तदेवानामपि जरामरणमोक्षरूपकैवल्यानुभव प्रसङ्गात् । अपक्षे विनाशपरत्वेतु नायं प्रसङ्गः । सर्वेपि पातभीतस्य क्षयष्णोर्नास्ति निवृत्तिः इत्याद्यनुसारेण पातशब्दितनाशस्य क्षायिष्णु शब्दिता पक्षयस्यप्रकृति भोग सामान्ये दुरपद्मवत्वादित्येषादिक । यच्चेक्तं चरमश्लोकाधिकारे । एवं विभव्यूहसालोक्यादिषु मुक्ति शब्दोपि निर्वाह्य इत्यादि ना प्रतिबुद्धस्तु मोक्षभागितिवचनात्सिद्ध इत्यन्तेन लोकेषु

विष्णोरिति श्लोके सायुज्यएव मोक्ष शब्दो नियमतः । चतुर्विधाममजना इत्यादि श्लोक त्रयेण केवलात्मानुभवो नित्यो न भवति । साक्षान्मोक्षश्चनभवतीत्ययमर्थः सिद्धः इत्युक्तं । तत्रेत्थ मुत्तरमुक्तं रहस्यविवेके । सालोक्यादिषु मुक्ति शब्दोप्याचार्यहृदयतद्वयारव्यानादिषु चतुर्विधो मोक्षइति सालोक्यसारूप्य सामीप्य सायुज्यानीत्युक्त चतुर्विधमोक्ष इति च द्रमिडोपनिषत्भाष्ये मोक्षविकल्पोनाम सालोक्यसारूप्यसामीप्य सायुज्यानीत्येतानि ।
आर्जवन्नामसालोक्यादीनामस्मिन्मोक्षसद्भाव इति च परमपदे चतुष्टय सद्भावनिर्वाहात् सोपि मुख्य इति निर्वाह्यः ये तु शिष्टा इत्यादि श्लोके च्यवने फलकाम नायाः हेतुत्वेनोक्ततया फलार्थीनमेभक्तस्सवैवणीगित्युक्तरीत्या अनन्यभोगत्व स्वरूप हानिरेव च्यवन शब्दार्थः । अन्यथास्वानुभाव्यफलप्रच्युतिश्चेत् स्वकीयफलकामनया प्राप्तस्वार्थानुभवकैंकर्ये अप्यनित्येस्याताम् । भगवतो नित्यत्वात्ते अपि नित्ये इति चेदात्मनोपि नित्यत्वा तदनुभवोपि नित्यो भवति । तस्मात्स्वफलकामनया प्राप्त भगवत्स्वार्थ भगवदनुभवकैंकर्यकामानामात्मानुभव कामानामैश्वर्यकामाना इच्छैकरूप्येण स्वरूप प्रच्युचिकेव च्यवन शब्दार्थो भवितुमर्हति । अत्र नित्यफलार्थिनां स्वरूपहानिर्नित्या । अनित्यफलार्थिनामनित्येत्युक्तं भवति । नित्यानित्य फलानां नित्यानित्यसंसारत्वबुद्धयाहि सायुज्यस्य तद्राहित्यमपेक्ष्य सतुमोक्ष उक्त इत्युक्तिः । प्रतिबुद्धस्तु मोक्षभागिति ज्ञान्येवतं लभत इत्युक्तिश्च तस्माज्जरामरणमोक्षसद्भावमपेक्ष्य कैवल्यं मोक्षइत्युक्तेर्नविरोध इति । अत्रायमभिप्रायोऽनुसन्धेयः । व्यूहविभवादि सालोक्यादिषु मोक्ष शब्दस्य मुक्तत्वेपि परमपदंगतस्य सालोक्यादिषु भावान्तराभावन्यायेन सर्वबन्धविनिर्मोकरूपेषु मुख्यत्वमेवेत्यभिप्रेत्य तस्यतत्र मुख्यत्वे सम्प्रदायतां च दर्शयति । सालोक्यादिष्विति । मुक्ति शब्दोपीत्यपि शब्देन कैवल्य विषयमुक्तिशब्दस्समुच्चीयते । आचार्य हृदयेति । आचार्यहृदये तद्व्याख्यानयोश्चेत्यर्थः । श्रीदेवराजगुरूसूक्तिः, श्रीमद्वरवरमुनि सूक्तिश्च व्याख्यानशब्देन विवक्षिते चतुर्विधो मोक्षइतीति शब्देन आचार्यहृदयसूक्तिरूपात्ता इत्युक्त चतुर्विधमोक्षइति इतिशब्देन तद्व्याख्यानसूक्तिद्वयमुपात्तम् । इत्येतानीति सद्भाव इति च कलिजिज्जगदाचार्यसूक्तिद्वयमुपात्तम् । तत्र सालोक्य सारूप्यसामीप्य सायुज्यानीत्येतावन्मात्र मनुवत्वा इत्येतानीत्यधिकोक्त्या

सालोक्यादेः पूर्वोक्तरीत्या मोक्षशब्द वाच्यत्वमुपपद्यत इति तात्पर्यं । अस्मिन्मोक्षइत्यनेन मोक्ष शब्दार्थं मुक्तिरेव

भगवत्प्राप्तिरूप साक्षान्मोक्षस्यार्जवं लोकेषु विष्णोरित्युक्तरीत्या एकैकलाभो अनार्जवमिति तात्पर्यं च गम्यते, चतुष्टयेति सालोक्यादिकं विवक्षितं । निर्वाहादिति भावान्तराभावन्यायेन मोक्षशब्दं मुख्यार्थत्वं तद्विशेष्यासंकुचितत्वस्य विवक्षितं । सोपीति । सालोक्यादिषु मुक्तिशब्दोपि मुख्यार्थ इति सोपि निर्वाह्य इत्यन्वयः । सोपि सालोक्यादौ मुक्ति शब्दोपीत्यर्थः । अपि शब्देन कैवल्य विषयमुक्ति शब्दोगृह्यते । अथ च्यवनशब्देन आत्मानुभवस्य अनित्वरूपबाधकं सतुमोक्ष उक्तः प्रतिबद्धस्तु मोक्षभागितिकैवल्यस्य मोक्षत्वाभाववचनद्वयरूपबाधकं च परिहरति । येतुशिष्टा इत्यादि श्लोक इत्यादिना । येतु शिष्टा इति श्लोके तु शब्देन तेषामुकान्तिनइति श्लोकोक्त ज्ञान्यपेक्षयावैलक्षण्य मुच्यते । पूर्वत्र हि चतुर्विधाममजना इति श्लोकेन चतुर्विधाधिकारि प्रस्तावपूर्वकं तेषामेकान्तिन इति श्लोकेन तिरियाधिकारिणः । आधिक्यमुच्यते । तत्र चतुर्विधाममजना इति श्लोके हि शब्देन चतुर्विधा भजन्त इति गीता प्रसिद्धि रभिप्रेता । भक्ता इत्यनेन ममजना इति

षष्ठ्यर्थसम्बन्धो विवृतः । अवधारणेन भगवत्प्राप्त्यभावादैश्वर्यकैवल्यार्चिनोर्नभक्तत्वमिति शंकापरिहृतादौदार्यातिशयेन सकलफलप्रदत्वाद्विष्णोः फलान्तरार्थनोपि विष्णुभक्ताएवेतिभावः । ऐश्वर्य कैवल्यभगवल्लाभार्थित्वेन अधिकारि त्रैविध्यमभिप्रेत्य पृथक्पृथगित्युक्तं । पृथक् पृथक् चतुर्विधा इत्यन्वयः । तेषां ज्ञानीनित्ययुक्त एकभक्तिर्विशिष्यते । प्रियोहि ज्ञानिनोत्थमहं सचममप्रियः । इति गीतासूक्त्यर्थः । तेषामेकान्तिन इति द्वितीयश्लोके न प्रदर्श्यन्ते । इयं हि तेषां ज्ञानीतिगीताश्लोकभाष्यसूक्तिः । तेषां ज्ञानीविशेष्यते । कुतः नित्ययुक्तः एक भक्तिरिति च । तस्यहिमदेकप्राप्तस्यमयायोगो नित्यः । यावत्स्वाभिलषितप्राप्तिमयायोगः । तथा ज्ञानिनोमय्येकस्मिन्नेव भक्तिः । इतरयोस्तु स्वाभिलषिते । तत्साधनत्वेन मयि च । अतस्स एव विशिष्यते । किञ्च प्रियोहि ज्ञानिनोत्यर्थमहं । अत्रार्थशब्दोऽभिधेयवचनः । ज्ञानिनोहं यथाप्रियः तथामयासर्वज्ञेन सर्वशक्तिनाप्यभिधातुं न शक्यत इत्यर्थः । प्रियत्वस्य इयत्ताराहित्यात् । यथाज्ञानिनामग्रेसरस्य प्रह्लादस्य सत्वासक्तमतिः कृष्णेदश्यमानोमहारगैः । नविवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थित इति । सोपि तथैवमप्रिय इति । एषा च तत्रत्यतात्पर्यचन्द्रिकासूक्तिः । एवं भक्तभेद उक्तः । तत्र प्रबुद्ध्य श्रैष्ट्यं दर्शयति तेषामिति । निर्धारणे षष्ठी विशिष्यते श्रेष्ठतम इत्यर्थः । किं प्रशंसामात्रार्थमिदमिति शंकते । कृत इति वैशिष्ट्यहेतुपरं विशेषणद्वयं इत्याह । नित्ययुक्त एकभक्तिरिति चेति ।

ज्ञानिनोहीत्यादि प्रापकस्य तस्यैवप्राप्यत्वात् । फलदशाया ममपि योगोऽनुवृत्त इति अर्थः । आर्थस्यार्थार्थइनश्चैकाधिकरित्वनिर्णयादितस्योरिति द्विवचनं । एतेनार्थार्थिनः फलदशायां परमात्मभोग्य तानुसन्धानं नास्तीति सिद्धं । एकस्मिन् भक्तिर्यस्य स एकभक्तिरिति व्याधिकरण बहुव्रीहिः । एकशब्दाभिप्रेतमुपास्यफलयोरभेदं दर्शयितुं एकस्मिन्नेवेत्यवधारणं । प्रियोहीत्यादिनाहेत्वन्तरमुक्तमित्यभिप्रायेणाह किञ्चेति । अतिशयकाष्ट्वां वक्तुमाह । अर्थशब्दोऽभिधेय वचन इति अत्यर्थमत्यभिधेयमभिधेयातिक्रमणं चात्राभिधेयान्तराद्वैलक्षण्यं । तच्छाभिधातुमशंख्यतेत्यभिप्रायेणाह ज्ञानिनोहमिति । अभिधातुमित्यस्येश्वरवचनत्वात्तेनाप्यशक्यमिति फलितमित्यभिप्रायेणोक्तं मयेत्यादि ।

ननु सर्वज्ञेन यदज्ञातं तदसदेवस्यात् । यत्रचासावशक्तः तत्रस्यानीश्वरत्वं स्यादित्यत्राह । प्रियत्वस्येति । गगनकुसुमादि तदसत्वनिबन्धनमज्ञानं न दोषाय । अन्यथा भ्रान्तत्वप्रसङ्गात् इयत्ताया अभावादेव तद्वाचक शब्दोपि नास्तीति तदप्रयोगो नायुक्तिहेतुरिति भावः । हि शब्दद्योतितां प्रसिद्धिमुदाहरति यथेति । ज्ञानिनामग्रे सरस्येत्यनेन जन्मसिद्धनिरतिशयज्ञानवत्वं बाधकवचनादिभिर्बिभीषिकासहस्रैश्चाकंपितत्वं विवक्षितं । कृषिर्भूवाचकइशब्दोणश्चनिर्वृतिवाचकः इति कृष्णशब्देनात्र निर्वृति हेतुत्वादिकं विवक्षितं । प्रवाहानादि कृष्णावतारकृतकालीयमर्दसूचनं वा भक्तदुःखानां कर्षणाद्वा कृष्णः तत्र दुःखहेतुसद्भावेपि दुःखानुभवाभावेपि निरतिशयप्रीत्यन्तर्निमग्नतयेति भावः । आत्मज्ञानमपि तदानीम्मृग्यं । किं पुनर्गहादिकल्पशरीरज्ञानमित्यात्मनोगात्रमित्यस्य भावः, स च ममप्रिय इत्यत्रापीत्यर्थ शब्द समुच्चय सामर्थ्यादर्थ स्वभावाच्छानुषक्त इत्यभिप्रायेणाह तथैवेति । यथाह त्रिविधपरिच्छेदरहितनिरतिशयानन्द स्वरूपो अनन्त गुणविभूतिज्ञानिनः प्रियः । तथा अयमेकएव ज्ञानीममनिरतिशय प्रीति विषय इत्युक्तं भवति । स च ममप्रिय इत्यत्र निरतिशय प्रीति कुर्वतोपिमहादारस्येश्वरस्यतन्प्रीत्युपाधिक प्रीतिकरणाद त्रृप्तिस्सूचितेति केचिदाचार्य इति । श्रोत्रृणां सुखप्रतिपत्यर्थमेतस्सूक्तिर्व्याख्यायते । स्वमहात्म्यं प्रकृत्यास्यतिरोधिश्शरणागतिः, भक्तिभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तममुच्यते इति भगवद्यामुनाचार्य सूक्तिं हृदिनिदाय तत्र तुरीयार्थपरत्वं चतुर्विधा भजन्ते मामिति श्लोकस्याह एवमिति । तेषामित्यादि सुदुर्लभ इत्यन्त श्लोकत्रयस्य पञ्चमार्थ परत्वमाह तत्रेति भक्तेष्वित्यर्थः । प्रबुद्धस्येति । प्रतिबद्धस्तु मोक्षभागित्युक्त ज्ञानिन इत्यर्थः ।

चतुर्विधा ममजना इत्यादि श्लोकस्थ प्रतिबुद्धशब्दस्मारणमुखेन तत्संवादप्रदर्शनाय प्रबुद्धस्य श्रैष्ठ्यं सप्ततुनोच्यत इति यामुनाचार्यैरनुगृहीतं । तत्र तेषा मेकान्तिन इत्येकान्तिपदं प्रतिबुद्धपदं च ज्ञानीचेति पृथक् पृथगिति तत्रत्योपक्रमानुसारात् ज्ञानि परमिति यामुनार्थाभिप्राय इति भावः । तेषां ज्ञानीति न कर्तरि कर्मणि वा षष्ठी । अन्यस्यास्य ज्ञानानाश्रयत्वात् । इनि प्रत्ययान्तस्य ज्ञानि पदस्य कृदन्तत्वाभावाच्चेत्यत आह । किन्तु तेषामेकान्तिनःश्रेष्ठा इति वचनानुसारेण श्रैष्ठ्यपर इत्याह श्रेष्ठतम इत्यर्थ इति । परस्पर व्याकृतेस्सार्वत्रिकत्वेन व्यावर्तकत्वात् श्रेष्ठ्यमेवधात्वर्थः आर्तापेक्षया अर्थार्थी श्रेष्ठः । दुःखरहितत्वात् । तदपेक्षया जिज्ञासुः श्रेष्ठतरः अतिशयितानन्दसत्वात् तदपेक्षया ज्ञानीश्रेष्ठतमः ।
अतिशयितस्वरूपानुरूपपरिपूर्णानन्दवत्वादितिभावः । अतस्सएव विशिष्यत इति नित्ययुक्तत्वैकभक्तित्वयोः वैशिष्ठय

हेतुत्वस्य वक्ष्यमाणतया कृत इति हेत्वाकाङ्क्षाप्रदर्शनं व्यर्थमित्याशंक्य श्रुतिवाक्य एव भगवद्वाक्येपि हेतुत्वाकाङ्क्षाविरहात् । हेतूक्ति व्यर्थेति शंकायां वपोत्खननाडिवाक्य इव असदर्थवादत्व शंकापरिहारार्थं तदुक्तिरित्यभिप्रायेणावतारयति किं प्रशंसेति कृत इत्यत्र आहेति वक्तव्ये कृतः नित्ययुक्त एकभक्तिरिति चेत्यनन्वयमित्याशंक्य इति शब्दो न प्रतीकोपादानपरः । किन्तु हेतुपरः । तथा च कृत इति हेतुत्वाकाङ्क्षा प्रदर्श्यनित्ययुक्त एकभक्तिरिति मूले हेतुगर्भं विशेषणद्वयमित्यभिप्रायेणनित्ययुक्तत्वादेक भक्तित्वाच्चेति हेतुत्वं कण्ठोक्तं अतोनान्वय इत्याशयेनाह । वैशिष्ठयहेतु परमिति । भगवत्स्वरूपेण संयोगलक्षण सम्बन्धस्य सर्वेषामात्मानां नित्यत्वात् अव्यावर्तकभिया भगवदनुभवरूपानन्तयोगस्य नित्यत्वं विवक्षणीयं । तच्छज्ञानिनामनादौ संसारे बाधितमित्याशंक्य नित्यशब्देन साधनदशायां साध्यदशायां इच्छानन्दरूपानुभवसत्वं विवक्षितमिति

परिहारमभिप्रेत्य ज्ञानिनोहोत्याद्युक्तं तत्रप्राप्यत्वमानन्दरूपानुभव विषयत्वं । मत्पदं साधनीभूत भगवत्परं । एकशब्दस्साधनातिरिक्त प्राप्यनिषेधपरः । तथा च ज्ञान्यपेक्षया साधन दशायां साध्यदशायां चानन्दरूपानुभव विषयत्वादितराधिकारिद्वयापेक्षयातदभावाच्च नित्ययुक्तपदं व्यावर्तकमिति तात्पर्यमभिप्रेत्याह । प्रापकस्य तस्यैवेति । आर्तार्थिजिज्ञासूनां त्रयाणां व्यावर्त्यत्वादितरयोरित्ययुक्तमित्याशंक्याहर्तस्येति । प्राप्यशब्देन संयोघानुभाव्यत्व विवक्षायामैश्वर्य कैवल्यार्थिनोरपि सत्वादानन्द रूपानुभवविषयत्वं विवक्षितमित्याह, एतेनेति । अर्थार्थिन इत्यार्थोपि संग्रहीतः । इदं च कैवल्यार्थिनोप्युपलक्षणं ।

ब्रह्ममदीयानन्दरूपानुभव विषय इति ज्ञानं भोग्यतानुसन्धानं । एकभक्तिरित्यत्र सप्तमीतत्पुरुषो भाष्याभिप्रेत इत्युक्तौ ज्ञानी विशिष्यत इत्यनेनानन्वयमाशंक्याह । एकस्मिन् भक्तिर्यस्येति व्यक्तैकत्वव्यावर्तकतया एकत्वं मात्रार्थगर्भं । तथा च साधनाभिन्न फलविषयकत्वं भक्तावेक भक्तिरित्यनेन विवक्षितं । तेन च विशेषणेन साधनभिन्नफलविषयक भक्तिर्व्यावर्त्यते । तथाचैश्वर्यार्थिनः कैवल्यार्थिनश्च भिन्न भिन्न साधनफल विषयक प्रीतिरूपभक्ति साध्यत्वात् । साधनानुष्ठानस्य ज्ञान्यपेक्षाफलस्यैवोपारयत्वेन रूपेण साधनत्वादेकव्यक्तिरूप साधनफलाविषयकप्रीति रूपभक्तिस्साधनानुष्ठानसाधनां तथा च फल दशायां ज्ञानिनोऽन्यापेक्षयां व्यावृत्तिर्नित्ययुक्त इत्यनेनोक्ता । साधनदशायां तस्य तस्माद्व्यावृतिरेकभक्तिरित्यनेनोच्यत इति भाष्याभिप्रायमाह एकशब्दाभिप्रेतामिति । अत्र नित्ययुक्त इत्यनेन अनन्यभोग्यत्वस्वरूपं एकभक्तिरित्यनेन अनन्यशरणत्वस्वरूपं च ज्ञानिन ऐश्वर्यकैवल्यार्थ्यपेक्षयाव्यावर्तकत्वेनाभिप्रेतमिति भाष्यटीकयोस्तात्पर्यमनुसन्धेयं । प्रियोहीत्याद्युतराधे हि शब्देन हेतुपरेण पूर्वोक्तहेतुपपादक परत्वं प्रतीयते । हेतुद्वयस्य पूर्वमुक्तत्वेन विशिष्यत इत्यत्र हेत्वाकाङ्क्षाविरहात् तथा च किञ्चेत्ययुक्तं । हेतूपपादकस्य च पूर्वमनुक्तत्वादित्याशंक्य अर्थसामर्थ्याद्विशिष्यत इत्यत्र तृतीयहेतुपरमुत्तारार्धमिति भाष्याभिप्रायमाह प्रियोहीत्थादिनेति । अत्यर्थ प्रिय इत्यनेन स्वातिरिक्त प्रयोजनमतिक्रम्यस्वयमेवभोग्य इत्यर्थः विवक्षासम्भवादर्भिदेय परत्वोक्तिः किमर्थत्याशंक्य नित्ययुक्त एकभक्तिरिति पदद्वयेन स्वयमेव भोग्यत्व लाभात् अपौनरुक्त्याय निरतिशयभोग्यत्वं विवक्षणीयमित्यर्थ शब्दो अभिधेयपर एवेति भाष्याभिप्रायमाह अतिशयकाष्ठामिति यदतिशयाश्रयापेक्षया अतिशयितं नास्ति सः अतिशयकष्ठा अनवधिकातिशयेत्यत्र अतिशये अनवधिकत्वं स्वसमानाधिकरणापकर्षावधिभिन्नत्वमिति व्याख्यानात् । तथा च प्रियत्वे वाचामगोचरत्वोक्तौ तत्रातिशयकाष्ठाभूतो तिशयोलभ्यत इति भावः । अत्यर्थमित्यत्र अर्थशब्दस्य नित्यपुल्लिङ्गत्वप्यतिक्रान्तार्थकं यथा भवति तथेति क्रियाविशेषणत्वेनैव नपुंसकस्य वक्तव्यतया तद्दार्ढ्यार्थमत्यर्थःमत्यभिधेयमित्युक्तं । अत्यर्थमित्यनेन अतिशयितार्थकत्वोक्ता विरुद्धमतिकृद्दोषस्यात् । अतो अतिक्रमणपरत्वं स्वातिकमणस्य बाधितत्वात् । अभिधेयान्तरपरत्वं चवदन्नभिधेयान्तरा सम्बन्धत्वोक्तौ प्रकृतानुपयोगात् भेदपरत्वमाह । अभिधेयानतिक्रमणं चेति । च श्शंकानिवृत्तौ ।

अत्रेत्यनेन अभिधेयान्तरासनसम्बन्धित्व वचनं प्रकृतानुपयुक्तमिति सूच्यते । अभिधेयान्तरातिक्रमणमभिधेयान्तरेष्टनन्तर्भावः । तत्रतत्तद्वयक्तित्वापेक्षया भिन्नत्वेनेत्युक्तावव्यावर्तकत्वं स्यात् । अतो अभिधेयत्वेन रूपेणाभिधेयान्तर वैलक्षण्यमभिधेयान्तरातिक्रमणमित्यभिप्रेत्याह तच्चेति । च शब्दः पूर्ववत् । ज्ञानिनोहमितीति । अभिधातुश्शक्यता समभिव्याहृत प्रियत्वरूपणेति वक्तुं ज्ञानिनोहमित्याद्युक्तमितिभावः । केनाप्यभिधातुमशक्यमिति वक्तव्ये कर्तुराक्षेप सिद्धस्यमयेति संकोचो न युक्त इत्याशंक्य

आक्षिप्तकत्रृष्वसंकोचेन ईश्वरस्यापि प्रवेशात् । ईश्वरेण वक्तुमशक्यत्वे अन्यैर्वक्तुमशक्यत्वोक्तेरप्रसक्तिप्रतिषेधत्वात् कैमुतिकन्यायसिद्धत्वात् । वक्तृत्वेनोपस्थितमहमितिकण्ठोक्तमीश्वरः परित्यज्यसर्वस्य कत्रृत्वाक्षेपेणाभिधानपर्यवसानानुपपत्तेश्च मयेति विभक्ति विपरिणामेन अव्याहत मित्यभिप्रायेणाह अभिधातुमशक्यमित्यस्येति । तेनापीति । न तु तेनैवाभिधातुमशक्यत्वं विवक्षितमितिभावः ।

ननु इयत्ताराहित्यमात्रेणाभिधेयानन्तर्भावो न सिध्यति । इयत्ताराहितमभिधातुमशक्यत्वं विवक्षितमिति भावः ।

ननु इयत्ताराहित्यमात्रेणाभिधेयानन्तर्भावो न सिध्यति । इयत्ताराहित्यमात्रेणाभिधेयानन्तर्भावो न सिध्यति । इयत्ताराहितमभिधातुमश्यकमित्यभिधेयत्वादित्याशंक्य अभिधेयसामान्यानन्तर्भाव - वचनस्यापार्थकतया यद्यदि यदीयदीत्यभिधातुं शक्यं । त..... नन्तर्भावः साध्यत्वे न विवक्षितः । अतो न हेतुसाध्ययो विरोध इत्यभिप्रेत्य अत्यर्थप्रिय इत्यस्य अभिधेयसामान्यानन्तर्भावस्वरसस्य इयत्तया अभिधातुमशक्यत्वपरत्वे मूलभूतामनुपपत्तिं दर्शयति । नन्विति । ज्ञेयत्वाभिधेयत्वयोस्समप्राप्ततया अनभिधेयत्वाक्षिप्तमज्ञेयत्वमपि दूषयति । सर्वज्ञेनेति कण्ठोक्तं दूषयति यत्र चेति । च स्समुच्चये । यस्मिन्विषये वचनाशक्त इत्यर्थः । तत्रेति तथा च सर्वेश्वरत्व भङ्ग इति भावः । अत्र सर्वज्ञत्वभङ्गोप्यभिप्रेतः । असत्ख्यातिवादमाश्रित्य अज्ञानाशक्त्योरदोषत्वमाह गगनकुसुमादिवन्यादिना । दृष्टान्तस्य श्लोकविवक्षितत्वे मूलमात्र शब्देति विशिष्यत इत्युक्तार्थे हेतुपरोपिहि शब्दस्तन्त्रेण प्रसिद्धि परोपीतिभावः । अग्रेसरत्वंद्वेधोपपादयति, ज्ञानिनामिति । अत्र श्रीविष्णुपुराण प्रह्लादचरितादिकमभिप्रेतं । कृष्णशब्दरूढिनिमित्ते

दिव्यमङ्गलविग्रहसामान्यरूढिं विना वसुदेवकुमारविग्रह विशेषेपि रूढिरस्तीत्यभिप्रेत्य भविष्यद्विग्रहसाक्षात्कारानुपपत्तिं परिहरन् व्यङ्गमर्थादयाप्रकृतोपयोगि कृष्णवृत्तान्तोप्यभिप्रेतः इति दर्शयति । प्रवाहानादीति । व्याकरणप्रसिद्धमाह । भक्तेति । आत्मगात्रवेदनाभावे आसक्तमतिरिति हेतोरुक्त्वेन तत्स्मृत्याह्लादसंस्थित इति व्यर्थमित्याशंक्य गात्रवेदन हेतुभूतमहारगदंशस्य आसक्तमतिरित्युक्त व्यासङ्गनिवर्तकतया आसक्तमतिर्नवेदेत्ययुक्तमिति शंकापरिहारार्थं तत्स्मृत्याह्लादसंस्थित इत्युक्तमित्याशयेनाह । तीर्व दुःखेति । आत्मानं न वेदेति पर्याप्तौ गात्रपदं व्यर्थमित्याशंक्य समाधिपर्यन्तयोगकाष्ठानिष्ठस्य बाह्यपदार्थेषु सर्वेन्द्रियनिवृत्या तत्साक्षात्कार सम्भवेपि जीवात्मस्वरूप साक्षात्कारामादि सामान्यस्वशरीर साक्षात्कारसम्भवः कैमितिक न्यायसिद्ध इति । सूचयितुमात्मपद मित्यभिप्रायेणाह । आत्मज्ञानमपीति । एतेनपरगात्रस्यापि वेदनाभावेनात्मनोगात्रं न वेदत्यपि शंकानिरस्ता । स च ममप्रिय इत्यत्रात्यथपदाभावात् ज्ञानिनः प्रियत्व मात्रं, अत एव च शब्दोऽन्वाचये इति प्रतीयते । अतस्तथैवेत्ययुक्तं इत्याशंक्य कैवल्यविशिष्टात्मस्वरूपेपि भगवत्प्रियत्व सद्भावेन प्राकरणिकज्ञानिव्यावृत्त्य सिद्धि प्रसङ्गात् । स च ममप्रिय इति पर्याप्तौ अन्वाचयचकारोपि व्यर्थस्यात् सममप्रिय इति पर्याप्तौ अन्वाचयचकारोपि व्यर्थस्थात् । यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवतीति भाष्यसूक्त्यभिप्रेतलोकसिद्ध व्याप्ति बलेन ज्ञानिनः प्रियतमत्वावश्यं भावात् स्वभावविरोधश्चस्यात् । अतोत्यर्थपदस्यानुपंजनीयतया समप्रधानयोरेकक्रियान्वयरूप समुच्चयद्योतकश्च शब्द इति । स च ममप्रिय इत्यनेन भगवदपेक्षया ज्ञानिनोत्यर्थप्रियत्वरूपं कैवल्यार्थिव्यावर्तक सिद्धयत्येवेत्यभिप्रायेणाह

। स च ममप्रिय इत्यत्रापीति । न केवलं भगवत इव सर्वबन्धविनिर्मुक्तजीवस्वरूपस्य निरतिशयानन्दरूपतयातयोः प्रियत्वे समप्राधान्यं । अपि तु सचममप्रिय इत्येकवचनस्य प्रियोमामित्येकवचनस्येव एकव्यक्तिपरत्वानुपपत्या सर्वज्ञानिपरत्वेपि स इत्येक वचनं तत्तद्ज्ञानिनां प्रत्येकमेकत्व परमिति वक्तव्यत्वेनापरिच्छिन्न स्वरूपरूपगुण विभूति । भरपरिमिततया भोग्यस्येश्वरस्यात्यर्थ प्रियत्वमुक्त्वा तत्स्थाने एकैकज्ञानिव्यक्तिनामत्यर्थप्रियत्वोक्त्या ज्ञानिगतभगवत्प्रियतस्य प्राधान्यं लभ्यते इत्यभिप्रायेणाह, यथाहमिति । एतेनप्रियोहि ज्ञानिनामत्यर्थमहते च ममप्रिया इति । निर्देशस्स्यादिति शंका निराकृता । यद्यप्यार्तोजिज्ञासुरित्यादाविवजात्येकवचनत्वेन

वनामित्यादाविव समुदायकवचनत्वेन वा निर्वोदुं शक्यं तथापि तदुभयोक्तेः प्रकृतानुपयोगात् ज्ञानिनः भगवदपेक्षया अत्यर्थप्रियत्वस्याधिक्य लम्भकतया ज्ञानिनां प्रत्येकमेकत्व परमिति वक्तव्यत्वेनापरिच्छिन्न स्वरूपरूपगुणविभूतिभिरपरिमिततथा भोग्यसेश्वरस्यात्यर्थप्रियत्वमुक्त्वा तत्स्थाने एकैकज्ञानिव्यक्तीनामर्थप्रायत्वोक्त्या ज्ञानिगतभगवत्प्रियत्वस्यप्राधान्यं लभ्यते इत्यभिप्रायेणाह यथाहमिति । एतेन प्रियोहि ज्ञानिनामत्यर्थमहं ते च ममप्रिया इति निर्देशस्यादिति शंका निराकृताम् । यद्यप्तार्तोजिज्ञासुरित्यादाविवजात्येकवचनत्वेन वनमित्यादाविवसमुदायैक वचनत्वेन वा निर्वोदु शक्यं । तथापि तदुभयोक्तेः प्रकृतानुपयोगात् । ज्ञानिनः भगवदपेक्षया अत्यर्थ प्रियत्वस्याधिक्यलम्भक्तया ज्ञानिनां प्रत्येकमेकत्वपरमेकवचनमितिभावः । प्रियोहि ज्ञानिनोत्यर्थमहमित्युक्त्वा स च ममप्रिय इत्युक्त्या भगवत्प्रियत्व प्रयुक्तं ज्ञानिप्रियत्वमिति लभ्यते । तथाचाद्वेषप्रभृति नित्यकैंकर्य साम्राज्यफलप्रदतया महादारस्येश्वर स्यज्ञानि पूर्वमेवात्यर्थप्रियः । एवं स्थिते ज्ञानिकत्रृक स्वविषयकार्त्यर्थमीत्यनन्तरं तत्प्रयुक्तज्ञानिष्वयकभगवत्कर्त्रृकार्त्यर्थ प्रीतेरुक्ततया ज्ञानिकत्रृकार्त्यर्थप्रीतेर्ननित्यतया तत्प्रयुक्त भगवत्प्रीतेरपि तथात्वेन च ज्ञानिनोत्यर्थ प्रियत्वाधिक्यं लब्धमित्यभिप्रायेण तथैवेति

सावधारणं भाष्यकारैरनुगृहीतमिति पक्षान्तरमाह । स च ममप्रिय इत्येत्यादिना । इत्थं तेषां ज्ञानीतिश्लोके फलशायां ब्रह्मभोगाभावात्साधनदशायामेकव्यक्तिमात् विषयकभक्त्यभावात् ब्रह्मव्यत्यर्थप्रीत्यभावात्स्वस्मिन्ब्रह्मणोऽत्यर्थ प्रीत्य सद्भावाच्च जिज्ञासुर्ज्ञानपेक्षया नश्रेष्ठः । एतद्वैपरीत्यात् ज्ञानीतदपेक्षया चतुर्था श्रेष्ठ इति सिद्धं । एवं चतुर्विधं श्रैष्ठ्य मुदरा इत्यादि श्लोकद्वयेन दृढीकृतं । तत्रेदन्तातावच्छ्लोकद्वयं । उदारास्स्रवं एवैते ज्ञानीत्वात्मैव मेमतं । आस्थितस्सहियुक्तात्मामामेवानुत्तमां गतिं । बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते वासुदेवस्सर्वमिति समहात्मा सुदुर्लभः इति । इयं चात्यत्र भाष्यसूक्तिः । सर्व एवैते मामैवोपासत इत्युदाराः वदान्याः येमत्तो यत्किञ्चिदपि गृह्णाति तेपि मम सर्वस्वदायिनः । ज्ञानीत्वात्मैवमेमतं तदायत्तधारणोहमिति मन्ये, कस्मादेवं यस्मादयं मयाविना आत्मधारणसम्भावनया मामेवानुत्तमं प्राप्यमास्थितः । अतस्तेन विनाममाप्यात्मधारणं न सम्भवति । ततो ममात्मा हि सः । नाल्प संख्यासंख्यातानां पुण्यजन्मनामिदं फलं । यन्मच्छेषतैकरसात्मयायात्म्य ज्ञानपूर्वकमत्प्रपदनं । अपि तु बहूनां पुण्यजन्मनामस्ते अवसाने वासुदेवशेषितैकर सोहं

तदायत्तस्वरूपस्थितिप्रपत्तिश्च । स चा संख्येयैः कल्याणगुणैः परतर इति ज्ञानवान् भूत्वा वासुदेव एव मम परमं प्राप्यं प्रापकञ्चान्यदपि यन्मनोरथवर्ति, स एव ममतत्सर्वमिति मां प्रपद्यते मामुपास्ते । स महात्म । महामनाः सुदुर्लभः दुर्लभतरो लोके । वासुदेवस्सर्वमित्यन्यायमेवार्थः । प्रियो हि

ज्ञानिनोत्यर्थमहमास्थितः सहियुक्तात्मा मामेवानुत्तमाङ्गतिमिति प्रक्रमात् ज्ञानवांश्चाय मुक्तलक्षण एव अस्यैव पूर्वोक्त ज्ञानित्वात् । भूमिराप इत्यारभ्य अहंकार इतीयं मेभिन्नाप्रकृतिरष्टदा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धिमेपरां जीवभूतामिति हि चेतनाचेतनद्वयस्य परमपुरुषशेषषतैकरसतोक्ता । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथामत्तः परतरं नान्यत्किञ्चिदस्तिधनञ्जय इत्यारभ्य, येचैव सात्विकाभावाः राजसान्तामसाश्चये । मत्त एवेतितान्विद्धिनत्वहन्तेषु तेमयि । इति प्रकृतिद्वयस्य कार्यकारणोभयावस्थस्य परमपुरुषायत्त स्वरूपस्थिति प्रवृत्तित्वं, परमपुरुषस्य च सर्वैः प्रकारैः सर्वस्मात्परतरत्व मुक्तमतस्स एवात्र ज्ञानीत्युच्यते इति । अत्र चेयं तात्पर्यचन्द्रिकासूक्तिरनुसन्धेयातेषामिति श्लोकस्यार्थ एवोदारा इत्यस्येनापि दृढीक्रियते । ज्ञानिनोत्यर्थप्रियत्ववचनात् अन्येषामपि किञ्चित्प्रियत्वं फलितं । तदेवोदारास्सर्व इति वादेन विशदीकृतं । तदेकोपायत्वस्य साधारण्यं मामेवोपासत इत्यनेन दर्शितं । उदारशब्दस्यात्रमन्दप्रयोजनात् कर्षमात्रपरत्वण्युदासाय प्रसिद्धयनुरोधेन आह वदन्या इति । अर्थित्वे नावस्थितानां कथं वदान्यत्वमित्यत्राह ये उक्त इति । सकलफलप्रदत्वलक्षणं परमौदार्यमेव हि ममसर्वस्वं । तच्च प्रतिगृहीत्रृसापेक्षं । तदर्थ्यभावे कथं स्यादित्युक्तं भवति । मम नपुंसकत्वं न ज्ञानीत्यनेनान्वयः । मत इति परोक्त च स्त्व प्रसिद्धः । तस्मादिति शब्दोऽध्याहृतः । अयमर्थस्त्रय्यन्तसिद्धान्तविरुद्धोभवतुमाह कृष्णसिद्धान्तस्त्रावदयमितिभावः आत्मशब्दस्यात्र बहुप्रमाणिविरुद्धत्वान्नता दात्म्यादिविषयत्वं, तथासति व्यतिरेक निर्देशबाधश्चातस्तदभिप्रेतमाह तदयत्तेति शरीरं प्रतिधारकोह्यात्मा प्रियत्वातिशय प्रतिपदाय सावधारणीयमात्मत्वारोपः । अस्मिन्नभिमानमात्रसारेभवत्सिद्धान्ते किं प्रमाणमभिमतमित्याकाङ्क्षायामास्थित इत्यादि कमुच्चत इत्याह कस्मादेवमिति । हि हैतौ । युक्तात्मेत्याशंसायां युक्तः परमात्मा योगाशंसा विशिष्ट एवात्मायस्यसोत्रयुक्तात्मा । तदेतदभिप्रेत्योक्त मयाविनात्मधारणा संभावनयेति मदनुसन्धानाभावे सत्यर्थान्तरानु सन्धानाभावेसत्यर्थान्तरानुसन्धान प्रवृत्ते रसमर्थस्वभाव तथेत्यर्थः । मामेवेति । अयुक्तदशायामसत्वमेव हि स्यादिति भावः । मामेव

उपायभूतमेव । न तु फलान्तरमित्यर्थः । प्राप्यमिति गतिशब्दार्थगन्तव्यपरः । अस्त्येवं त्वदायत्तधारणो यथाप्रमाणं ज्ञानी ततः किमायातंभवतः तदायत्तधारणत्वस्येत्यत्राहा तस्तेनविनेति सदृढयानां मदभिप्रायविदां चैतद्युक्तमित्यभिप्रायः । तथा हि न तस्यान्यः प्रियतरः प्रतिबुद्धैर्महात्मभिः । विद्यतेत्रिषु लोकेषु ततोस्मोकान्तितांगतः । सारद्वैतद्धिते सत्यं वचनं समुदाहृतं । नास्यभक्तेः प्रियतरं लोके किञ्चन विद्यते इति । ततो ममात्महि सः इति आधारत्वादि विशेषोह्यत्कलक्षणमितिभावः । ऐश्वर्यादिकामास्त्वत एवमस्वरूपस्यातिश्यहेतवः । ज्ञानी तु मम स्वरूपसत्ताहेतुरिति स्वभक्तस्तुति परश्लोकः । पुनरप्युक्तज्ञानवत्वस्य अनेक जन्मसाध्यपुण्यफलत्वेन दुर्लभतरतया ज्ञानिनश्रैष्ठ्यं दर्शयति बहूनामिति श्लोकेन । ये जन्मकोटिभिस्सिद्धास्तेषा मन्त्रेत्रसंस्थितिरिति भगवच्छास्त्रं जन्मान्तरसहस्रेष्वित्यादिकांस्मृतिं चानुसन्धान आह । नाल्पेति । बहूनां जन्मनामित्यत्र नतावद्भहुजन्मसद्भाव मात्रं विवक्षितं । तस्यात्रानुपयुक्तत्वात् न च बहुजन्ममात्रस्यज्ञानहेतुत्वमुच्यते । सर्वेषामयत्नतो ज्ञानित्वप्रसङ्गात् । अतः पुण्यजन्मनामिति विशेषितं । ईदृशज्ञानवत्वं एवंभूतविशिष्टप्रपत्तौहेतुरिति दर्शयित्वा ज्ञानवतोऽनेकजन्मभ्रमण्युदासार्थं च ज्ञानवान्भूत्वेत्युक्तं । वासुदेवस्सर्वमिति सामानाधिकरण्यस्य

बाधाध्यासतादात्म्यादि विषयत्वायोगाच्छरीरशरीरिभावादिनिर्वाहदपि प्रकरणविशेष सिद्धस्य अर्थस्य ग्राह्यतरत्वात् परमप्राप्यमित्यादिकमुक्तं । लौकिकं धारकादिकमभिप्रेत्याहान्यदपीत्यादि । त्वमेव

माता च पितात्वमेव । मातापिताभ्रातानिवासश्शरणं सुदृद्गतिर्नारायण इत्यादिकमपीहाप्रेतं । प्रपत्तेरत्रोपासनाङ्गत्वादाह मामुपास्त इति । ज्ञानिनोपि स्वरूपमहत्वं प्रमाणविरुद्धं । पङ्क्तिपावनत्वादि मामात्म्यं सदपि प्रकृतेऽनपेक्षितं । तस्माद्ज्ञानविशेषाधीनं माहात्म्यमिहाविवक्षितं इत्याह महामना इति । फलान्तरपरस्यापि भगवदुपासकस्य दुर्लभत्वात् । तद्वयवच्छेदाय सुशब्द इति दर्शयितुं दुर्लभतर इत्युक्तं वासुदेवस्सर्वमित्यत्र सामानाधिकरण्यस्य पराभिमतार्थं प्रतिक्षिपन् स्वोक्त दृढयति । वासुदेवइत्यत्रह्युपक्रमः प्राप्यभेदनिबन्धनानुकारीभेदपरः । अतः प्रकरणविरुद्धः । प्रकरणानुपयुक्तोषार्थः । प्रकरणविशेषसिद्धोपयुक्ततमार्थे जागरूकेनादरणीय इति भावः । ज्ञानवानित्यत्रापिनिर्विशेषादिज्ञानजीवमात्रज्ञानादिव्युदासायाह ज्ञानवांश्चायमिति । उक्तलक्षणः वासुदेवशेषतैकरसस्वात्मवेदीत्यर्थः । उक्तलक्षणत्वहेतुमाहस्यैव

पूर्वोक्तज्ञानित्वादिति ज्ञानीचभरतर्षभेति पूर्वोक्तेज्ञानिनि कथमुक्तलक्षत्वामित्यत्राह । भूमिरापइत्यारभ्येति । यद्वा पूर्वोक्तिज्ञानित्वादित्येकभक्तित्वादिकं विवक्षितं । भूमिरूप इत्यादिना हेत्वन्तरोक्तिः । कार्यकारणोभयावस्थस्येति । कार्यत्वकारणत्वरूपोभयावस्था विशिष्ठस्येत्यर्थः । स्वरूपस्थित्यादितादधीन्यम्मयि सर्व रसोहमित्यादिषु व्यक्तं । उक्तलक्षणत्वं निगमयति अत इति । स एवेति । वासुदेव शेषतैकरसोहमित्यादिनोक्त लक्षण एवेत्यर्थः । इति श्रोत्रृ प्रतिपत्ति सौकर्यायेयं सूक्तिर्व्याख्यायते प्रियोहीत्यादिवत् उदारा इत्यस्यापि ज्ञानिन एव कैवल्यार्थ्यपेक्षया वैलक्षण्यान्तर परत्वभ्रमं वाति तेषामिति श्लोकस्येति । ऐश्वर्यकैवल्यार्थिनां सिद्धेश्वर रूपेधर्मणि औदार्यरूपधर्ममात्र सम्पादकत्वं, ज्ञानिनस्तु भगवत्स्वरूपधारकतया धर्मिसम्पादकत्वमिति हि वैलक्षण्यमुदाराइत्यत्रोच्यते । एवं स्वरूपधारकत्वात् फलदशायां भोग्यत्वानुसन्धानलक्षणनित्ययुक्तत्वं साधनदशायां भगवत एव फलत्वेनाभि निवेश लक्षणैकभक्तित्वं च ज्ञानविषये भगवता संकल्पितं । एवं ज्ञान्यपेक्षया स्वस्यात्यर्थ प्रियत्वं च तत्वसाक्षात्कार प्रयुक्तात्मधारकत्वात् भगवतासंकल्पितमिति पूर्वोक्त चतुर्विधवैलक्ष्यण्यमुदा पादक उदारा इति श्लोक इत्यभिप्रायेणोक्तं दृढीक्रियत इति । ज्ञानीत्वात्म्यैवेति ज्ञानिन एव धारकत्वोक्त्यावैलक्षण्य सिद्धेरौदार्योक्तिर्व्यत्याशंक्य ऐश्वर्य कैवल्यार्थिनां स्वापेक्षया ज्ञानिनोत्यर्थप्रियत्वोक्ति सिद्धंस्वप्रियत्वं भगवतो नाविकन्यायेन ऐश्वर्यकैवल्यार्थिपरित्याज्यत्वादयुक्तमिति शंका परिहारार्थमौदार्योक्तिरित्यभिप्रायेणाह ज्ञानिन इत्यादिना विशदीकृतमित्यन्तेन । फलान्तरार्थिनां सकलफलप्रदत्वलक्षणादार्यसम्पादकतयैव औदार्यस्य वक्ष्यमाणतयातैरूपास्यत्वं तेषामौदार्येन हेतुरित्याशंक्यसर्वाधिकार्यपेक्षया साक्षादनिष्ट निवृत्ति पूर्वकेष्टप्रापणरूपभगवदुपायत्वस्य स्वरूप योग्यतारूपस्यस्वाभाविकस्यान्यर्थं भगवत्सम्पादिततया व्याज्यरूपेण भगवदुपासने नैवफलोपधायकतारूपत्वेन तादृशोपायत्वं चतुर्विधा भजन्ते मामित्युक्तोपास्यत्वस्य अत्र विवक्षितत्वोक्त्या सूच्यत इत्यभिप्रायेणाह । तदकोपायत्वस्येति । प्रतिगृहीत्रृषुवदान्यत्यस्य वक्ष्यमाणरीत्या विलम्बितप्रतीतिकतया उदारोदात्रृमहतोरित्युक्तमहत्वस्यदेवतोपासके सुग्रहतया च वदान्य इत्यर्थ कथनमयुक्तं इत्याशंक्य सामान्यतोदेवतोपासकत्व लक्षणोत्कर्षस्य स्वोपासकत्व प्रयुक्तस्वगतफलप्रदत्वलक्षणौदार्य सम्पादकत्वस्यैव पूर्वोक्तस्वप्रियत्वानापादकत्वेन प्रकरणानुसारात् विलम्बिनोपपादनीयमपि वदान्यत्वमेवोदार शब्दार्थः । महत्व

विशिष्टेवदान्य इव प्रयोगप्राचुर्याभावदपि झडिति प्रतीतवदान्यत्वमेव शब्दस्वभावादपि प्रकृते विवक्षितमित्यभिप्रायेणाह उदारशब्दस्येति, अत्र अस्मिन् प्रकरण इत्यर्थः । अत्यर्थ प्रियत्वोक्ति सिद्धान्तप्रियत्वोपपादनं प्रकरणानुसारीतिभावः । मन्देति मन्दप्रयोजनं यदुत्कर्षसामान्यपरत्वं

तद्वयुधासायेत्यर्थः । स्वोपासकत्वस्येवोपासकत्वसामान्यस्य स्वप्रियत्वानापादकत्वादितिभावः । प्रसिद्धयनुरोधेनेति शब्दस्य भाव उक्तः । यत्किञ्चित्फलप्रदत्वसम्पादकतया प्रतिगृहीत्रृणां औदार्यगुण पदात्रृत्वेनौदार्योक्ति सम्भवात् । सर्वस्वदयिन इत्युक्ति वैफल्यमित्याशंक्य यत्किञ्चित्फलप्रदत्वलक्षणौदार्य सम्पादकतया प्रतिगृहीतुरुदारत्वेदेवतान्तरोपासकस्यापि तथात्वेन तद्व्यावृत्यर्थं स्वोपासकेविशेषलाभाय सर्वस्वदान प्रयुक्तमौदार्यमत्र विवक्षितमिति सूचयितुं, सर्वस्वदानोक्तिरित्यभिप्रायेणावतारयति । अर्थित्वेनेति । कथमिति । दातुरेव वदान्यत्वादितिभावः । अन्यथादेवतान्तरोपासकस्यापि फलप्रदत्वसम्पादक तथा उदारत्वप्रसङ्ग इत्यपि तात्पर्यं । एतच्चोपलक्षणं । उदारशब्दासंकोच स्वारस्येन सर्वस्वदानोक्तिरिति शब्दस्वभावोप्यभिप्रेत इति बोध्यं ।

ननु यत्किञ्चित्फलं नस्वरसत्वेन रूपयितुं शक्यं । देवतान्तरोपासकेति प्रसङ्गस्य उक्तत्वात् । भगवतो अतिक्षुद्रख्यातिपरत्वप्रसङ्गाच्चेत्याशंक्य निरूपाधिकसर्वस्वस्वामिनो भगवतः स्वचरणकमलसमाश्रयण प्रदानस्यैव

परमौदार्यकार्यतया क्षुद्रफलप्रदानं, शिशुविषयेमातुः मृद्भक्षण प्रदानवत् भगवतश्चेतनविषये अत्यन्तदयाक्षान्त्यादि गुणातिशय सूचकतया औपाधिकस्वामिषु देवान्तरेषु यत्किञ्चित्फलप्रदानेन तादृशगुणातिशया सिद्धया तदुपासकेषु नातिप्रसङ्गः । त्रिवर्गापवर्ग फलप्रदत्वस्योदारशब्दासंकोचन औदार्यहेतुफलप्रदत्वघटकत्व तया सिद्धया च सर्वफलप्रदत्वमेवात्र सर्वस्वत्वेन विवक्षितमिति देवतान्तख्यावर्तक सकल फलप्रदत्वरूपगुणानुसन्धानपरतया न द्वितीयदोषोपीत्यभिप्रायेणाह सकलफल प्रदत्वलक्षणमिति । अवधारणहि शब्दाभ्यामप्यहं जीवितं जिह्यामित्याधिकमभिप्रेतं । परमिति । सकलफलप्रदत्वे मोक्ष प्रदत्वस्याप्यन्तर्भावात् प्राप्तशेषिणो प्राप्तफलप्रदानेदयाक्ष्यान्त्यादि गुणातिशयलाभाच्चेतिभावः । तत्पदद्वयं सकलफलप्रदत्व रूपपरमौदार्यपरं ।

ननु परमौदार्यसम्पादकस्य कथदात्रृ लक्षणमौदार्यं परमौदार्यस्यस्वनिष्ठत्वाभावेन स्वकीयस्यपरकीयत्वापादनासिद्धेरित्याशंक्यौदार्य सम्पादकस्य शब्दस्य लक्षणयोदारं शब्देन

व्यवहारस्सम्भवतीत्यभिप्रायेणाह । इत्युक्तं भवतीति । यस्त्रद्वेद यत्सवेद, समयैतदुक्त इत्यत्रचान्दसमेवनोक्त एतदुक्तशब्देपुल्लिङ्ग निर्वाहवत् ज्ञानित्वात्म्येवमेमतमित्यत्रमत-शब्देनपुंसकलिङ्गस्यार्षत्वेन निर्वाहसम्भवादिति शब्दाध्याहारो न युक्त इत्याशंक्याध्याहारं समर्थायिष्यन् तन्मूलभूतानुपपत्ति प्रदर्शनमुखेन परकीय निर्वाहं तावन्निरस्यतिमतमिति । नपुंसकत्वादिति । अप्रसिद्ध इति । सार्वजनिन गीतोपनिषद्ध्येत्रृ सम्प्रदाय विरुद्ध इत्यर्थः । किं च मत इत पाठ कल्पने, चान्दसत्व कल्पने च ज्ञानीत्वात्म्यैवमे इत्येवपर्यास्यामतपदं व्यर्थंस्यात् । इतिमेमतमित्युक्तौ तु भगवतस्स्वेतरसमस्तधारकत्वस्य सर्व वेदान्तसिद्धतया ज्ञानिनो भगवद्धारकत्वमयुक्तमिति शंकाया ज्ञानिनो भगवत्प्रियतमत्वेन भगवतो ज्ञानिविशेषासहिष्णुत्वसिध्याभगवद्गुणकृतं ज्ञानिनोधारकत्वं सम्भवतीति । परिहारो लभ्यत इत्यानर्थक्य प्रतिहतन्यायेनाध्याहार एवयुक्त इत्यभिप्रायेणाह यमर्थ इति । ज्ञानिनो भगवद्धारकत्वरूपार्थ इत्यर्थः । अर्जुनः केशवस्यात्माकृष्णस्यात्माकिरीटिन इत्यादि वेदान्तोपबृङ्मणेषु भक्तानां भगवद्धारकत्व प्रसिद्धया वेदान्तप्रसिद्धयभावेपि नतद्विरोध

इत्यभिप्रायेणभक्तुवामावेत्युक्तं । तावच्छब्दः क्रमार्थः कृष्णसिद्धान्ते निश्चिते वेदान्तसिद्धान्तोप्युन्नेतुं शक्यत इति भावः । आत्मशब्दस्य स्वरूपपरत्वं नियन्त्रृपरत्वं वाकुतोनेत्यत्राहात्मशब्दस्येति । बहुप्रमाणेति । भेदश्रुति घटकश्रुतिकार्यकारणभाव इति तादृशोप ब्रह्मणजात विरुद्धत्वादित्यर्थः । व्यतिरेकेति । मे आत्मेति भेदघटित सम्बन्ध वाचिषष्ठी श्रुतिविरोध इत्यर्थः । धार्यस्य धारकत्वोक्तौ धार्यत्वनिषेधे च आत्मैवेति पदद्वयमप्रमाणं स्यादित्याशंक्य ब्रह्मवेदब्रह्मैव भवति तस्यप्रियमेव शिरं इत्यादिष्विव तात्पर्य विषयार्थ विशेषलाभात् तात्पर्य विषयार्थे प्रामाण्यसम्भवाच्च शब्दविधया बोध्यार्थ बाधो न दोषायेति परिहारं वक्ष्यन् धारकत्वस्सात्मशब्दमुख्यार्थत्वमाह शरं प्रतीति । नियाम्यत्व धारत्वशेषत्वानां शरीरलक्षणतया शरीरप्रतिसम्बन्धिवाचिनात्मशब्देन

धारकत्वमुच्यत इति भावः । प्रियत्वातिशयप्रतिपादनायेत्यनेन तादात्म्याद्यर्थकत्वे प्रकरण विरोधश्चेति तृतीयं दूषणमभिप्रेतं । आत्मत्वारोप इति ।
ज्ञानकालमारभ्यक्षणविश्लेषानर्हत्वलक्षणप्रियतमत्पोपपादकाकार आत्मपद- लक्षणयालभ्यते । तस्य यावदात्मभावित्वेनायोगव्यवच्छेद एवकारेण लभ्यते । एवं चात्मैवेति पदद्वयेन मुख्यार्थविषयकाहार्यशंशब्दबोधानन्तरं वाक्यप्रामाव्यायलक्ष्यार्थविषयक

शाब्दबोधोजायत इति भावः । ज्ञानी त्वात्म्यैवमेवतमिति भगवद्वाक्यस्यैव भगवदपेक्षया ज्ञानिनः क्षणविशेषानर्हत्वे प्रमाणतया अस्थितइत्याद्युत्तरार्धमनवसरग्रस्तं अन्यथाहेत्वधिकरण विरोध इत्या शंक्य न बाधशंक्योत्तरवाक्यप्रवृत्तिः । अपित्वेतावंतंकालविद्यमानस्य भगवतो ज्ञानिविश्लेषासमानरूपकार्यस्यकारणेन विनानुपपत्तेस्सामर्ग्याः कार्यव्याजतया सामग्रीरूप ज्ञापकांक्षायां कारणविशेष घटित सामग्रीं सूचयितुमुत्तरार्धेन कारण विशेषः प्रदर्श्यते । इत्यभिप्रायेण कस्मादेवमिति हेत्वाकांक्षा भाष्योक्तामुपपादयति अस्मिन्निति । अभिमानमात्रेति मात्रशब्देन कारणविशेषो व्यावर्त्यते । सारशब्देन शब्दविधया ज्ञापकं प्रमाणमभिप्रेतं किं प्रमाणमिति भवदुक्तबाधितार्थे सामग्री रूपज्ञापकं किमभिमतमित्यर्थं । एतावन्तं कालमविद्यमानस्यकारणविशेषस्यापरिज्ञानादिति भावः । उच्यत इत्योहेति । कस्मादेव मित्यत आहेतिभाष्यार्थइति भावः । हिशब्दस्य प्रसिद्धिपरत्वसम्भवेत्युपवाद्योपपादक भावेन पूर्वोत्तरवाक्ययोरूपपाद्योपपादक भावेना न्वयार्थमाह, हि हेंताविति ।
मयाविनाममधारणासम्भावनयेत्यतन्मूलारूढं दर्शयितुमाह, युक्तात्म्येत्याशंसायामितिक्तः क्तप्रत्यय इत्यर्थः, युक्तात्मेत्यस्य नित्ययुक्त इतिवत् कर्तरिक्त प्रत्ययान्तत्वे पौनरूक्त्यं तदुपपादकत्वासिद्धिश्चेतिभावः युक्तपदार्थयोगप्रतियोगिनं दर्शयन् आत्मशब्दस्य स्वरूपपरत्वमभिप्रयन् सर्वं वाक्यं सावधारणमिति न्यायेन मयाविनात्मधारणासम्भावनयेति

व्यतिरेकलाभ इत्याशयेनाह परमात्मयोगिन्यादिना विशिष्टपदेनोपलक्षितं व्यावर्त्यते । एवकारेण ज्ञानिनो ज्ञानित्वावस्थानन्तरं परमात्मयोगाशंसा विशिष्टत्वायोगो व्यवच्छिद्यते । सोत्रेत्यनेन नियुक्त इति शब्दो व्यावर्त्यते । अत्रास्मिन्प्लोक इत्यर्थः । युक्तात्मा, युक्तात्म शब्दवाच्य इत्यर्थः । ज्ञानिनोयावदात्मभाविपरमात्मयोगाशंसाविशिष्टत्वोक्त्या परमात्मविना आत्मधारणासम्भवः कथं लभ्यत इत्याशंक्य क्षणविश्लेषासहनं विनानिरतिशयानन्दरूपत्वेन निरति शयानन्दरूपानुभव विषयत्वलक्षणपरमात्मयोगेसिद्धे पुनस्तदुत्कटेच्छा रूपाशंसाय असम्भवात् । कार्योक्त्याकारणलाभ इत्याशयेनाह तदेतदिति आशंसार्यत्वप्रत्ययविशिष्टं अवधारणगर्भं च युक्तात्मपदमभिप्रेत्येत्यर्थः ।

भगवत्स्वरूपस्य सर्वजगद्धारकतया भगवत्स्वरूपेण सम्बन्धाभावेसर्वस्यापि वस्तुनः सत्ताया एव सम्भवेन मयाविना आत्मानुधारणासम्भावनयेति ज्ञानिषु विशेषोक्तिरयुक्तेन्यत आहा

मदनुसन्धानाभावेसतीति । मयाविनेत्यनेन निरतिशयानन्दत्वविशिष्टवेषेण स्वरूपसत्ता विवक्षिता धारणासम्भावनयेत्यनेनावच्छिन्न स्मृतिसन्तानरूपपूर्वोक्त भगवत्स्वरूपानुसन्धानरूपश्रृत्यनुकूल व्यापारात्मक प्रवृत्तिजननस्वरूपायोग्यधर्मभूतज्ञानवत्वं विवक्षितं इत्यभिप्रायः । सत्यन्तेन पूर्वोक्तमदनुसन्धानेसति तादृशप्रवृत्ति योग्यत्वं धर्मभूतज्ञानस्यलभ्यते । धर्मभूतज्ञानस्य तादृशप्रवृत्यसमर्थत्वे तादृश प्रवृत्ति शंकाया अनवकाशात्, धारणासम्भावनयेत्यनेन तादृशप्रवृत्य समर्थस्वभाववत्वं लभ्यत इत्यपि तात्पर्यं । युक्तात्मेति पदमनुक्तमप्राप्यत्वेन भगवत्स्वरूपाध्यवसायरूपास्थाने हेतुपरमित्यभिप्रायेण सम्भावनयेति फलितार्थस्य हेतुत्वेन निर्देश इत्यभिप्रेत्यहेतुत्वं व्यतिरेकमुखेनोपपादयति । आयुक्तदशायामिति । मामेवेतेति प्रतीकोपादानं मामेवानुत्तमं प्राप्यमास्थित इति भाष्यस्यपदाभिप्रायेणेति बोध्यं । अयुक्तदशायां पूर्वोक्त नित्ययुक्त शब्द विवक्षितनिरतिशयानन्दत्वावस्थापन्नपरिपूर्ण ब्रह्मानुभवरूपप्राप्यभावदशायामित्यर्थः । असत्वमेवेति ।

पूर्वोक्तायन्तिरानुसन्धानविशिष्टतया सत्वाभाव इत्यर्थः । असत्वमेवेति ।
पूर्वोक्तार्थान्तरानुसन्धानविशिष्टतया सत्वाभाव इत्यर्थः । हि शब्दो हेतौ प्रसिद्धौ च । यन्मुहूर्तक्षणं वापीन्याद्युक्तेरिति भावः । गतिशब्दस्य करण व्युत्पत्तौ प्राप्यत्वालाभात् करक्मणीव्युत्पत्ति माहगतिशब्द इति । गति शब्दोऽत्रगन्तव्यपरः । कस्मादेवमित्यनेनास्थित इत्यादे रात्मैवेन्यत्रहेतु परत्वसिद्धया अत इत्यादि वाक्यं व्यर्थमित्याशंकय दार्ढ्यार्थं निगमनमिति वक्तुं दार्ढ्यमूलभूतशंकामाह अस्त्येवमिति, तत्वेवभयं विदुषोमन्वानस्येति श्रुतिवाक्ये अमन्वानस्य विदुषः अमननमेवभयमिति प्रतिपादनमभिप्रेत्ययथाप्रममित्युक्तं । किमायातमिति । किं साधकं लब्धमित्यर्थः । स्वरूपरूपगुणविभूतिविशिष्टब्रह्मस्वरूपस्य त्रिविध परिच्छेदरहित निरतिशयानन्दरूपतया तद्विषयकनिरतिशयानन्दरूपानुभवं विना ज्ञानिनो आत्मधारणासम्भवोयुज्यते । जीवस्य तु अणुभूतस्वरूपमात्रेण निरतिशयानन्दरूपतया तदनुभवं विना भगवत आत्मधारणा सम्भवोनयुक्त इति भावः । इत्यत्राहेति । जीवस्याणुस्वरूपमात्रेणनिरतिशयानन्दत्वेपि सृष्टयवतारादिमुखेन कृतभगवत् कृषीफलीभूतक्षणमात्र भगवद्विश्लेषासहनलक्षणालभ्याप्रियतमाकारलाभात् भगवतो ज्ञानिनं विना क्षणेपितेयद्विरहोऽति दुस्सह इति प्रसिद्धात्मधारणोसम्भवोयुज्यत एवेति

भाष्यतात्पर्यमितिभावः । दुर्हुदामुपकारव्यप्यपकारित्व दर्शनात् परस्परप्रियत्व नियमोनास्तीन्याशंक्य सहृदयविषयत्वादुक्त नियमस्य सुहृदं सर्वभूतानामित्याद्यनुसारेण भगवतस्सहृदयाग्रेसरत्वाच्च न दोष इत्याशये नाह, सहृदयानामिति । एतदिति । परस्परविश्लेषासहिष्णुत्वमित्यर्थः । यस्यायं निरतिशयप्रियः, स एवास्य प्रियतमो भवतीति भाष्यसूक्तिसिद्धां मिथोविश्लेषा सहनं वचनमित्याह तथाहीति । प्रतिबुद्धरिति । प्रतिबन्धस्तु मोक्ष भाव । समहात्मानुदुर्लभ इत्युक्तैर्ज्ञानिभिर्विनेत्यर्थः एवमुत्तरत्रापि, भक्तैर्विनाकश्चनप्रियतरो

नास्तीत्यर्थः । तत इति । भगवत्प्रियतमत्वार्थं भगवानेव परमप्राप्यप्रापक इत्यध्यवसायशालीमा प्राप्त इत्यर्थः । अतो ममात्माहि सः इत्यत्रमयाविना आत्मधारणासमर्थस्वभावत्वात् समहात्मेति हि

व्यवहारविषयोयत इति शब्दार्थमभिप्रेत्य हेतुमद्भावमुपपादयति, आधारत्वादीति ।
ज्ञानीत्वात्मैवेत्यत्र आत्मशब्दश्शरीरप्रतिसम्बन्धिपरः इति पूर्वमेवोक्तं । शरीरत्वं बाधेयत्व विधेयत्व शेषत्वरूपं ।

अतो धारकत्वादिकं आत्मशब्दप्रवृत्तिनिमित्तमितिभावः । जीवसामान्यस्य नित्यतया कालिकसम्बन्धेन भगवत्स्वरूपव्यापकत्व- रूपधारकत्वमव्यावर्तकमित्याशंकय तत्तत्फलप्रदानदशायां तत्तत्फलप्रदत्वरूपौदयिलक्षणकादाचिन्मधर्मसंवादका ऐश्वर्यादिकामाः यावदात्मभाविनिरतिशय भगवद्भोग्यत्वानुसन्धानरूपस्याहमन्नमिव्यादि श्रुतिप्रसिद्धस्य भगवत्सत्तात्वेन विवक्षितस्य सम्पादको ज्ञानीतिनाव्यावर्तकत्वदोष इत्यभिप्रेत्याह ऐश्वर्यादिकामा इति । स त इत्यनेन भगवदपेक्षया ऐश्वर्यादि कामानां निरतिशयभोग्यत्वा भावात् स्वस्वरूपाप्रयुक्तं मुक्तात्मापेक्षया निरतिशयभोग्यत्वानुसन्धानं भगवद्गतं विवक्षितं । अयं श्लोकः सज्ञानिनः ऐश्वर्यादि कामापेक्षया वैलक्षव्यमात्रपरः । अपि तु देवतान्तरभक्तापेक्षया स्वभक्तानां चतुर्णामपि देशकालविषयासंकुचितसकलफलपदत्व लक्षण भगवद्गतमहादार्य सम्पादकतया वैलक्षण्यपरः । अतः उदारास्सर्व एवैत इति स्वभक्तगुणकथनं प्रकृतानुपयुक्तमिति न शंकनीयमित्यभिप्रायेणाह इति स्वभक्तेति स्तुतिपरइत्यनेन नासता स्तुतिरूपपद्यते इति सूचितं । पूर्वं फलवैलक्षव्यात् ज्ञानिनोवैलक्षव्यमुक्तम् । इदानीं साधनवैलक्षण्यात्तदुच्यते । अतोन पौनरूक्तयमित्याशयेनाह । पुनरपीति । बहूनामित्यत्रत्रिचतुरादिपर्यवसान भ्रमवारणायापरमितपरत्वमुक्तं भाष्ये तत्संवाद प्रदर्शनेन दृढयति । येजन्मेत्यादि । वस्तु तस्तत्व ज्ञानस्य बहुजन्मानन्तर भावित्वात् बहूजन्मकथनं वेति विकल्पमुखेन प्राप्तदूषणपरिहारार्थं पुण्यजन्मनामित्युक्तमिति मत्वापुण्यपदव्यावर्त्य शंकामाह बहूनां जन्मनामित्यगेति । ज्ञानवानिति । ज्ञानपदस्य देहात्मविवेकजीवपरमात्मविवेकमात्र परत्वेनाप्युपपत्तौमच्छेषतैकरसात्मययात्म्य ज्ञानपरत्वोक्तिः । किमर्थेत्याशंक्य सर्वं खिल्विदं ब्रह्म, इदं सर्वं यदयमात्मा इत्यादि प्रसिद्धसार्वात्म्योपासनरूपज्ञानस्य वासुदेवस्सर्वमिति प्रपद्यतइत्येतद्विवक्षितत्वेन वक्ष्यमाणतया तादृशज्ञानेजीवपरमात्मविवेकमात्रं न हेतुः । अपि तु भगवच्छेषतैकस्सत्वेन भगवदपृथक्सिद्धधार्यत्वेन सर्वात्मना भगवन्नियाम्यत्वे न च जीवस्वरूपयायात्म्यज्ञानं हेतुरित्यभिप्रेत्यविशेषपरत्वोक्तिरित्याशयेनाह । ईदृशज्ञानवत्वमिति । ईदृशशब्देनमच्छेषतैकरसात्म यातात्म्यज्ञानरूपत्वं विवक्षितं । शेषत्वस्यात्मयाथात्म्यान्तर्भावोपि वपुरादिषुयोपिकोपि वेत्यनुगृहोतरीन्यावश्यज्ञातव्यत्वसूचनायशेषत्वं पृथगनुगृहीतमिति तात्पर्यं । ज्ञानवान् प्रपद्यत इत्यत्र सिद्धसाध्यसमभिहारन्यायेन प्रपदनहेतुज्ञानलाभात् । भूत्वेति पदाध्याहारः

किमर्थमित्याशंकय क्रियाकारकसम्बन्धापरित्याग न्यायेन ज्ञानवान् बहूनां जन्मनामन्ते प्रपद्यत इत्यन्वय भ्रमापत्तौ ज्ञानानन्तरमपि प्रपदनस्य बहुजन्मव्यवधानं शंकयेत । अतोऽन्ते ज्ञानवान्भूत्वेति क्रियाध्याहारः कृतः । नचाध्याहार एवदोषः । अन्यशब्दं ताधिकरमकारकस्य प्रपदन क्रियान्वय विवक्षायां ज्ञानवान्जन्मनामन्ते बहूनां मां प्रपद्यत इति निर्देशापत्त्याधिकरणकारकस्याध्याहृत क्रिययैवान्वयावगमात् । एवञ्च ज्ञानप्रपदनयोः कार्यकारणभावो न्यायं विना शब्दत एवलभ्यत इत्यपरमप्यनुकूलमित्यभिप्रायेणाह । ज्ञानवत इति । वाद्यन्तरोक्तार्थ भ्रमं व्यावर्तयन् शरीरशरीरि भावेनैक्य परत्वं विनाप्राप्यप्रापकधारकपोषकभोग्यरूपसर्वपरत्वे सर्वं खल्विदं ब्रह्म । इदं सर्वं यदयमात्मा सर्वत्रासौसमस्तं चेत्यादि श्रुतिस्मृति विरोधः । सर्वशब्दसंकोचश्चेति शंका च परिहरति वासुदेवस्सर्वमितीति । चोरस्याणुः

यद्रजतमभात्सशुक्तिरित्यादिवत् स वासुदेवो नयतोन्यदस्तीत्यादि

सिद्धिप्रपञ्चमिथात्वपरत्वं एकविभक्त्यन्त पदद्वयस्य बाधविषयत्वं । इदं रजतमयं सर्प इत्यादिवत् घटोस्ति घटोस्तीत्यादि भ्रान्तिसिद्धानिर्वचनीया भेदपरत्वं तस्याध्यासविषयं भेदसहिष्णुरभेदस्तादात्म्यं भिन्नत्वेसतिभिन्नसत्ताकत्वमिति यावत् ; तत्परत्वं तादात्म्य विषयत्वं । आदिपदेन पारमार्थिकौपाधिक स्वाभाविकाभेदद्वयपरत्वं गृह्यते । शरीरशरीरिभावादीति । शरीरशरीरिभावादि हेतुकनिर्वाहादित्यर्थः । शरीरगतधर्मस्य शरीरधार्म्यत्वात् । प्रवृत्ति निमित्ताश्रयस्य शब्दवाच्यत्वाच्च शरीरवाचिशब्दस्य शरीरपर्यन्तत्वेन भगवतस्सर्व शरीरकतया वासुदेवस्सर्वमिति सामानाधिकख्यमुपपद्यत इत्यर्थः । आदिशब्देन राजाराष्ट्रमिति वत्तत्प्रधानत्वात्तद्वयपदेशस्तस्मिन्निति निर्वाहो गृह्यते ।
बाधितार्थकत्वादप्यौपचारिकत्वमेवयुक्तमितिभावः । प्रकरणेति । जिज्ञासुमपेक्ष्यज्ञानिनोभिलषित साधनस्यानन्तजन्मसाध्यत्वलक्षणवैलक्षण्यस्य पूर्वश्लोकोक्तक्षणकाल भगवद्विश्लेषासहनहेतुतयाधारकपोषकभोग्यं सर्वं वसुदेव कुमार इत्यध्यवसाय लक्षणवैलक्षण्यस्य च प्रकरणानुगुणार्थत्वादिति भावः यद्यपि प्रपद्यत इत्युक्तोपासनस्य सार्वान्त्म्यानुसन्धानरूपतया शरीरशरीरि भावोपि ग्राह्यर्थ एव । तथापि तस्यभक्तचातुर्विध्यरूपगुणाप्रकरणसिद्धार्थानुगुणत्वमात्रं प्राप्यप्रापकंधारकपोषकभोग्यं सर्वं वसुदेव इत्यर्थस्य तु ज्ञानिनो जिज्ञासुवैलक्षण्यरूपावान्तरप्रकरणसिद्धार्थानुगुणत्वमस्तीत्यभिप्रायेण ग्राह्यतरत्वादित्युक्तं ।

एतेन प्रृतिस्मृतिविरोधोपि प्रत्युक्तः । सर्वत्रासौसमस्तं चवसत्यत्रेतिव्युत्पत्ति सिद्धार्थद्वयस्यापि ग्राह्यत्वसूचनात् । अत एव सर्वशब्दसङ्कोचोपि द्वरोत्सारितः । वासुदेवशब्दव्युत्पत्ति द्वयानुसारेण सावात्म्यरूपासङ्कुचितार्थ मङ्गीकृत्योपायापेयादिकं सर्वं कृष्ण इत्याधिकार्यस्यापि प्रकरणविशेषानुगुण स्यार्थस्यापि ग्राह्यत्वाभ्युपगमात् परम प्राप्यप्रापकार्थिनः अल्पप्राप्येच्छाया सम्भवात् अन्यदपीत्ययुक्तमित्याशङ्कय ऐेश्वर्य कैवल्यार्थिनोः पूर्वदुर्वासना वशादपरिहार्यं धारकपोषकभोग्यजातं ज्ञानिनो भगवानेवमुमुक्षुत्वावस्थाया मपीति वैलक्षण्यं प्रतिपादयितुं अन्यदपीत्युक्तमित्यभिप्रायेणाह लौकिकमिति । असार्वजनीनतया असम्भवं परिहर्तुं ज्ञानिनः धारकादिकं भगवानेवेत्यत्र प्रमाणमाह त्वमेवेत्यादिना । प्रपद्यत इत्यस्य शाधिमां त्वां प्रपन्नं । मामेव ये प्रपद्यन्त इत्यादि विरूपार्थोक्तौ हेतु महाप्रपत्तेरिति । अत्रेति । उपासन प्रकरण इत्यर्थः । सर्व वासुदेव इत्यध्य वसायस्य प्रधानभूतोपासनरूपत्वेन शरणागति रूपत्वाभावादिति भावः । आत्मशब्दस्य प्रसिद्धिबलेन धर्मि स्वरूपपरत्वेन मनः परत्वमयुक्तमित्याशङ्कय महाच्छब्दोन विभुपरः बाधात् । नापि पङ्क्तिपावनत्वाद्युत्कर्ष परः । ज्ञानिना मैश्वर्य कैवल्यार्थ्यपेक्षयावैलक्षव्य---रूपप्राकरणीकार्याननुगुणत्वात् । पङ्क्ति पावनत्वादेर्भगवद्पासकमात्रसाधारणत्वात् । आत्मशब्दस्य स्वरूरूपपरत्व महानित्येव पर्याष्या आत्म शब्द वैयर्थ्यप्रसङ्गाच्च । अतो महामना अनूचान मानीस्तब्दोसीतिकर्ममीमांसोपचितमनस्मत्ववत्कर्मब्रह्मोभयमीमांसितमनस्यत्व प्रयुक्तं जीवात्मनोभगवतच्छेषतैकरसज्ञानं प्रपद्यत इति । पदप्रयोगमहिमसिद्धभगवदेकोपायोपेयत्व धारकपोषक भोग्यत्वज्ञानविशिष्ट उपासनरूपज्ञानफलकं समहात्मेति । तत्पदसमभिव्याहारेण माहात्म्यरूपत्वेन विवक्षितं । अतो न बाधितार्थकत्वं । प्रकृतानुपयुक्तत्वं वैयर्थ्यं चेत्यभि प्रेत्याह ज्ञानिनपीत्यादिना । मनश्शब्दोमननकारणत्वावस्थाविशिष्ट अन्तः करणपरः । तत्र महात्मविशेषणेन महादार इत्यादाविवमननोत्कर्षोलभ्यत इत्याभिप्रायेणज्ञानविशेषाधीनं माहात्म्यमित्युक्तं । दौर्लभ्य निष्ठं सौष्ठवमन्यापेक्षया उत्कर्षरूपमित्यभिप्रेत्यतरप्रत्ययेन विवरणं

भाष्येकृतमित्याशयेन व्यावर्त्यं दौर्लभ्यान्तरं दर्शयन् सूपसर्ग तरप्रत्यययोः प्रयोजनं दर्शयति । फलान्तर परस्यापीति । मनुष्याणां सहस्त्रेषु कश्चिद्यततिसिद्धय इति फलन्तरपरस्य दौर्लभ्यं । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्तवतइतिज्ञानिनो दुर्लभतरत्वं चान्यत्रस्फषृमिति

भावः । अयमेवार्थ इत्यवधारणव्यावर्त्यं दर्शयन् प्रक्रमादि त्यन्तस्य परमतनिरसनपरत्वं तदुत्तरग्रन्थस्य स्वोक्तार्थदाढर्यपरत्वं चाह । वासुदेवस्सर्वमित्यत्रेत्यादिना । पराभिमतार्थश्च पञ्चधापूर्वमेव दर्शितः । स्वोक्तार्थश्चद्वेधादर्शितः । तु शब्देति ज्ञानीत्वात्म्यैवेति शब्दो विवक्षितः । प्रकरणविरुद्ध इत्यनेन बाधाध्यासाद्यर्थ पञ्चकं विवक्षितं । प्रकरणविशेषशब्देन ज्ञानिन इतरवैलक्षण्यकथनरूपावान्तर प्रकरणं विवक्षितं । अनुपयुक्त इत्यनेन शरीरशरीरिभावोगुणप्रधाभावश्चविवक्षितः । बाधाद्यर्थस्य भूमिरूप इत्यादि परमोपक्रमादि विरुद्धत्वात् । महाप्रकरण विरोधाभिप्रायेण प्रकरणविरुद्ध इत्युक्तं प्रकरणविशेषसिद्धेति तादृशार्यश्चोपायो पेयधारकपोषकभोग्यत्वरूपः । शरीरशरीरि भावगुणप्रधानभावयोरपि बहुजन्मसाध्य ज्ञानविषयत्वेन वैलक्षण्योपयुक्तत्वात् । तद्वयावृत्यर्थमुपयुक्ततमेत्युक्तं । उपायोपेयभावादिवत् । शरीरशरीरि भावादिकं उपायोपेय भावादिज्ञानद्वारा उपयोगि ननु साक्षादिति भावः । उक्तलक्षण एवेत्यव धारणव्यावर्त्यमाहज्ञानवानित्यत्रापीति । वासुदेवस्सर्वमिति ज्ञानेबाधादि विषयको निर्विशेषं ब्रह्मेतिज्ञानं, तादृशब्रह्मणः जीवस्यचैक्यज्ञानं च कारणं, सर्वंचेतन जातं वासुदेव एव नतीश्वरो नामकश्चिदस्तीति ज्ञानेजीव एव स्वकर्मवशात् बध्यतेमुच्यते चेति ज्ञानं कारणमिति भावः । जीवमात्रादित्यादिशब्देन सन्मात्रब्रह्मपरिणामोजीव इत्यादि ज्ञानं विवक्षितं । उक्तलक्षणपदस्य शरीरशरीरि भावादिज्ञानपरत्वे वासुदेव स्सर्वमिति ज्ञानकारणत्वं ज्ञानवानित्युक्त ज्ञानस्य नस्यादित्यत आह वासुदेव शेषतीति । ज्ञानीत्वत्र ज्ञनविशेषवाचि पदाभावात् तेन कथं ज्ञानवानित्यस्यार्थ विशेषनिर्णयइत्याशङ्कय ज्ञानीत्यस्यार्थ विशेष परत्वं साधयिष्यन् उपक्रमन्यायोत्राभिप्रेत इत्याह । उक्तलक्षणत्व इति । हेत्वन्तरपरत्वभ्रमं वारयति ज्ञानीचेति । उपसंहारस्योपक्रमानुगुणत्वेप्युपक्रमस्य सामान्यत्वान्ननिर्णायकत्वमिति भावः । परमोपक्रमानुसारेणोपक्रमार्थ निर्णयोऽअभिप्रेत इति भावः । उक्तक्रमस्यैवसाधनत्वमभिप्रेतमित्याह यद्वेति। उपक्रमस्य साधकत्वेपि परमोपक्रमस्यापि साधकत्वादधिकराधिकलाभलोभेन पूर्वयोजनाकृता । एतदभिप्रायेणहेत्वन्तरोक्तिरित्युक्तं । एक भक्तित्वादिमित्यादिशब्देन ज्ञानिनो भगवतश्चमिथः प्रियतमत्वं विवक्षितं । आस्थितस्सहियुक्तात्मेति प्राप्यप्रापकभावेननित्ययोगस्य वक्ष्यमाणत्वान्नि त्ययुक्तत्वादिकमित्यनुक्त्वा एकभक्तित्वादिकमित्युक्तं । धार्यधारकभावेन

भेदोव्यादिशब्दार्थः । कार्यकारणरूपाया उभयी अवस्था तद्विशिष्टस्येत्ययुक्तकार्यकारणयोरवस्थासंभवादित्याशङ्कय कार्य कारणरूपं यदुभयितस्यावस्थायस्येति वा । विग्रहमभिप्रेत्याह । कार्यत्वकारणत्वेरूपेति । कार्यकारणेति भावप्रधानो निर्देश

इति वा तात्पर्यं । उपास्तवचने षूत्पत्ति प्रलययोस्तादधीन्यलाभेपि स्वरूपस्थित्योस्तादधीन्यालाभात् । इत्यारभ्येति सङ्ग्रहीतवदने तात्पर्यमित्याह स्वरूपस्थित्यादीति । प्रवृत्यादिकमादि शब्दार्थः । वासुदेवसर्वमित्यस्य स्वाभिमतार्थ निगमने कार्ये ज्ञानिशब्दार्थ निगमनमयुक्तमित्याशङ्कय ज्ञानवानित्यस्य स्वाभिमतार्ये अस्यैवपूर्वोक्तज्ञानित्वादिति यो हेतुस्तस्यनिगमनमित्याह । उक्तलक्षणत्वमिति । हेतुमुखेन निगमयतीत्यर्थः । स एवेत्यनेन प्रकृतिद्वयस्य परमपुरुषस्य

चेत्युक्ताव्यवहितार्थद्वयपरत्व भ्रमंवारयति वासुदेव शेषतेति । इत्यमैश्वर्य कैवल्यार्थ्यपेक्षया ज्ञानिनोनित्ययुक्तत्वेन एकभक्तत्वेन भगवद्विषयाकात्यर्थ प्रीतिमत्वेन भगवतोत्यर्थप्रियत्वेन भगवतो धारकत्वेन भगवदेकोपायोपेयत्वाध्यव सायशालित्वेनानन्तजन्मसाध्यतत्व ज्ञानक्तवेन सुदुर्लभत्वेन चाष्टधावैलक्षण्यमुक्तं । अयमेवार्थश्चतुर्विधाममजनाइत्यादि श्लोक त्रयेणोप्यते । तत्र तेषामेकान्तिनश्रेष्ठा इति तेषांज्ञानी विशेष्यत इतिवत् ज्ञानिनः श्रेष्ठयं प्रतिज्ञायते । अत्रैकान्तिशब्दस्योद्देश्च समर्पकस्य विवरणं तेचैवेति एकश्चासावन्तश्च एकान्तः सोस्यास्तीव्येकान्ती । भगवदेकशेषिताध्यवसायरूपमुख्यनिश्चयकालीत्यर्थः । क्षेत्रज्ञस्येश्वर ज्ञानाद्वि जन्माशुद्धिः परमामताशेषशेषित्व विज्ञानाच्छुद्धिर्जीवस्यवर्णितेत्युक्तत्वात् । अनन्य देवता देवतान्तरशेषत्व गन्धरहिता इत्यर्थः । ऐश्वर्य कैवल्यार्थिसामग्रीन्द्रीदिदेवतान्तर्यामितया भगवद्भक्तानामपि देवतान्तरशेषत्वगन्धरहिता इत्यर्थः । ऐश्वर्यकैवल्यार्थि नामग्नींद्रादिदेवतान्तर्यामितया भगवद्भक्ता नामपि देवतान्तरशेषत्वगन्धोस्तीतित्वर्थेन च शब्देन अवधारणेन च द्योतितोन्यशेषत्वगन्धाभावोनास्तीति भावः । अथोत्तरार्धेन श्रेष्ठ शब्दस्य विधेयसमर्पकस्य विवरणं क्रियते । अहमेवेति । गम्यत इति गतिः । अनेननित्ययुक्तशब्दार्थ उक्तः । निरशीः कर्मकारिणां निर्गता आशीः येषान्ते निराशिषस्तेचतकर्मकारिणश्च तेषामित्यर्थः । साधनानुष्ठानदशायां फलान्त राभिनिवेशरहितानामितियावत् । अनेनैव भक्ति शब्दार्थ उक्तः। उक्तवैलक्षण्यमन्यत्र तद्वैपरीत्येनोपपादयति । येतुशिष्टाइति । शीष्टाः परिशिष्टा इत्यारादनोक्तिः फलकामा इति निरस्तातिशयाह्लादेत्युक्तभगवत्प्राप्ति व्यतिरिक्ता

फलप्रधानका इत्यर्थः । अनेनैक भक्तित्वव्यतिरेक उक्तः । सर्वेच्यवनधर्माण इति भगवत्प्राप्तिरूपफलात् । च्यवनं धर्मो येषांते ततोक्ताः । किञ्च भगवदत्यर्थप्रीतिमत्वभगवत्प्रियतमत्वाभ्यां च्यवनं धर्मो येषांत इत्यर्थः पूर्वोक्तः । अनेन नित्ययुक्तइत्यस्य प्रियोहि ज्ञानिनोत्यर्थमहमित्यस्य स च ममप्रिय इत्यस्य च व्यतिरेक उक्तः । अहमेवगतिस्तेषामित्येतद्विवृण्वन्ज्ञानिनः प्रकारान्तरवैलक्षण्यमाह प्रतिबुद्धस्त्व इति वासुदेवस्सर्वमिति प्रतिपत्तिमानित्यर्थः । मोक्षभाक् । मुक्तिर्मोक्षोमहानन्दभागित्यर्थः ऐश्वर्यार्थिनः सर्वबन्धविनिर्मोकरूपमुक्तिरेवनास्ति । कैवल्यार्थिनस्तु मुक्ति शब्द योगार्थयुक्तिसद्भावेपि महानन्दरूपरूढ्यर्थोनास्ति । तदीयब्रह्मानुभवस्यानन्दत्वा विरहेणानन्तगुणविग्रहविभूत्यंशेप्यपरिच्छिन्नब्रह्मस्वरूपानुभवस्यानिरतिशयानन्दत्वावस्थापत्तेर्दुरावास्तत वात् । इत्थं तेषा मेकान्तिन इत्यादि श्लोकद्वयेनैश्वर्य कैवल्यांर्थ्यपेक्षया ज्ञानिनः पञ्चधावैलक्षण्यमुक्तं तत्र इत्ययुक्तत्वैकभक्तित्व निरतिशय प्रीतिमत्वनिरतिशयप्रियत्वरूप वैलक्षण्य चतुष्टयोक्तिरूदारास्सर्व एवैत इत्यादि श्लोकद्वयोक्तधारकत्वाद्युपपादकचतुष्टथस्याप्युपलक्षणं । इत्थं गीतावाक्यप्रत्यभिज्ञानुसारेण तेषामेकान्तिन इत्यादि श्लोकस्य नित्ययुक्तत्वादि वैलक्षण्यपरत्व सिद्धावन्यत्रतद्वयतिरेक मुखेन तदुपपादकेयेतुशिष्टा इत्यादि श्लोकेच्यवनशब्देन पूर्वोक्त वैलक्षण्या भावस्यैवविवक्षणीयतयाच्यवनशब्दो जिज्ञासुफलभूतकैवल्यानुभवनाशपरो न भवतीति सिद्धं । तदेतत्सर्वमभिसन्धाय येतुशिष्टा इत्यादिश्लोके च्यवनरूपबाधकस्य प्रकारान्तरेण ज्ञानिगतवैलक्षण्याभवपरत्वेन परिहारमाहयेतुशिष्टा इत्यादिश्लोक इति हेतुत्वेनोक्ततयेति । फलकामाहितेमता इत्यत्रहि शब्दो हेतुपरः यतस्ते फलका मामता अतस्सर्वेच्यवन धर्माण इत्यन्वयः । भगवप्रीतिव्यतिरेकेण स्वगतफले च्छावत्वात् । च्यवनधर्माणइत्युक्ते मूलमन्त्र तृतीयपदप्रतिपन्नानन्यभोगत्वस्वरूपहानिरेव च्यवनशब्दार्थः । ऐश्वर्य कैवल्यार्थिनां स्वप्रीत्यर्थमेव भगवत्प्रीतेरिष्टतया स्वयं प्रयोजनभगवत्प्रीतीच्छाविरहेण देहिमे ददामित इत्युक्तरीत्या कर्मज्ञान

भक्तिरूपभवदारा धनेनतुभ्यं सुखं ददामि त्वमपि मह्यमैश्वर्यकैवल्यानुभवरूप सुखं देहीत्येवं क्रयविक्रयरूप वणिक्प्रायतया स्वभोगैकप्रवणत्वात् ।
नत्वैश्वर्यकैवल्यानुभवरूपफलनाशश्च्यवनशब्दार्थः । स्वगतफलेच्छावतोपि स्वगतनित्यफलेच्छासम्भवेन स्वगतफलेच्छावत्वस्य

अनित्यफलकत्वे हेतुत्वासम्भवादिति भावः । नमे भक्त इत्यपशुन्ययेनप्रशस्त भक्तो न भवतीत्यर्थः । अतश्चतुर्विधा भजन्ते मां । भक्ता एव हि ते श्रृत्या इत्याभ्यां न व्याघातः । अनन्यभोगत्वेति भगवद्भोग व्यतिरिक्त

प्रधानोद्धेश्यभोगाभावरूपेस्वाभाविकाकारहानिरित्यर्थः । हानिशब्देन भगवत्प्रियतमभूतपरमपुरुषार्थालाभ स्सूच्यते । फलस्यस्वगतत्वमनित्यत्वे । अप्रयोजकमित्युक्त्वार्थानुभव कैंकर्ययोर्नित्यफलत्वाभ्युपगमेन प्रतिबान्दिमा हान्यधेति । अनेनव्याभिचारस्सूचितः । अनाशेत्यस्यविवरणंस्वानुभाव्येतिस्वगतस्यानु भाव्यफलस्यनाशश्चवन शब्दार्थश्चोदित्यर्थः । अन्यभोगवत्वलाभाया नु भाव्येत्युक्तं । स्वप्रवृत्ति प्रधानोद्देश्य भोगरूपानुभवविषयत्वं ह्यनुभाव्यपद विवक्षिकतं स्वगतफलवत्वमत्युक्ते सोश्नुते । आनन्दीभवतीत्याद्यनुसारेण ब्रह्मभोगप्रधानोद्देश्यकानां ज्ञानिनामप्यन्यभोगवत्वप्रसङ्गः । स्वकीयेति । स्वगतफलस्य ज्ञान्य फलोद्देशानधीनत्वलक्षण प्राधान्येनेच्छयेत्यर्थः । सर्वज्ञानुभवविषयस्य नित्यत्वे सर्वज्ञानुभवस्यापि नित्यत्व मावश्यकमिति शङ्कते । भगवत इति । नित्यो भवतीति । न च कैवल्यार्थिन स्स्वानुभवस्यानित्यत्वेपि ब्रह्मानुभव स्येवानन्दमयावस्थानास्तीति शङ्कितु मपिशङ्कयं । रुचिविशेषाधीनकर्म विशेषण तस्मिन्ब्रह्मभोगप्रतिबन्धस्यात्मभोगोत्पत्तेश्च सर्वसिद्धत्वात् । प्रतिबन्दयुद्भावनेन फलितं दूषणं वदन्नुपसंहरति तस्मादिति । प्रतिबन्धस्तु मोक्षभागिति प्रतिबुद्धस्य फलान्तरोक्त्या सर्वेच्यवन धर्माण इत्यत्रा प्रतिबद्धानां सर्वेषां च्यवनधर्मत्वस्य वक्तव्यतया अप्रतिबुद्धकोटिनिविष्टस्वार्थानुभव कैंकर्य निष्टानां स्वगतानुभाष्यफलस्य नासाभावेननाशस्यच्यवन शब्दार्थत्वे तस्य स्वार्थानुभव कैंकर्य निष्ठेषु बाधितत्वेन तदंशे अनन्यभोग्यत्व स्वरूपहानिश्चयवन शब्दार्थ इति वैरूप्यं स्यादित्यभिप्रायेणाह ऐकरूप्येणेति ।

ननु कैवल्यार्थिनां फलनाशानभ्युपगमेतेषां तदाप्यनन्यभोगत्वाभावेन मूलमन्त्र आत्मसामान्यस्य अनन्य भोगत्वस्वरूपविरोध इत्याशङ्कय स्वार्थानुभव कैंकर्यनिष्ठेषु बाधितत्वेन तदंशेऽनन्यभोगत्व स्वरूपहानिच्यवनशब्दार्थ इति वैरूप्यं स्यादित्यभिप्रायेणाह ऐकरूप्येणेति ।

ननु कैवल्यार्थिनां फलनाशानभ्युपगमे तेषां कदाप्यनन्य भोगत्वाभावेन मूलमन्त्र आत्मसामान्यस्य अनन्यभोगत्वस्वरूप विरोध इत्याशङ्कय स्वार्थानुभनकैंकर्य निष्ठानामिव नित्यबद्धानामिव च प्रमाणबलेन कदाप्यनन्यभोगत्वं नास्तीत्यङ्गीकर्तव्यं । मूलमन्त्रे मकारेण स्वरूपयायात्म्य ज्ञानवतामेव अनन्यभोग्यत्वस्योक्ततया नतद्विरोधोपीत्यभिप्रायेणाहात्रेति । सर्वेच्यवनधर्माण इत्यत्रेत्यर्थः । फलकामशब्देन नित्यफलार्थविवक्षायां च्यवनशब्दो नित्यच्यवनपरः । अनित्यफलार्थि विवक्षायामनित्यच्यवनपरः इतिभावः । दूषणान्तरमाह नित्यनित्येति । च्यवन शब्दस्य फलनाशपरत्वे ऐश्वर्य कैवल्यार्थिनां ज्ञानिनां च नित्यनित्यफलत्वेनवैषम्यंस्यात् । तथा च प्रतिबन्धस्तु नित्यभागित्येव निर्देशस्स्यात् । अत एव तत्समानार्थके, स तु मोक्ष उक्त इत्यत्र स तु

नित्यभोग इति निर्देशस्स्यात् । स्वरूपप्रप्युतेश्च्यवन शब्दार्थे तु स्वरूप प्रप्युतेरेव संसार शब्दार्थत्वेन प्रतिबन्धस्तु मोक्षभागीत्यत्र निश्शेषसंसारनिवृत्ति वाचिमोक्षशब्दप्रयोग उपपद्यते । मोक्ष शब्दस्य महानन्दरूढयवैलक्ष्यन्तरमपि लभ्यते । अत एव सतुमोक्ष इत्यत्र महानन्दरूढिविवक्षया सालोक्यादि वैलक्षव्यस्य विवक्षितत्वेपि निश्शेष संसारनिवृत्तिरूप मोक्षशब्दार्थावैरूप्यं रूढयर्थ आदायेतरवैलक्षव्यपरत्वेनेकार्थ्यं च सिद्धयतीति भावः । तद्राहित्यमिति । संसारत्वराहित्यमित्यर्थः । अनेननित्य संसारकैवल्यमिति पक्षोपि समर्थितो भवति । स्वरूपप्रच्युतिविशिष्टतयावर्तस्य संसारशब्दार्थत्वे सर्वबन्धविनिर्मोकरूपस्यापि कैवल्यस्य संसारान्तर्भावोपपत्तेः प्रकृतिविशिष्टवेषेणसंचरणस्य निश्शेषनिवृत्तिमादायमोक्षशब्दमुख्यार्थत्वोपपत्तेश्च । ज्ञान्येवेति । ज्ञानिशब्देन प्रतिबद्धशाब्दार्थ उक्तः । अवधारणेन तु शब्दार्थः । तं लभत इति । मोक्षं लभत इत्यर्थः । अनेन सत् मोक्ष उक्त इत्यत्र सर्वनाम्नां विदेयलिङ्गभाक्त्वेन तच्छब्दस्सायुज्य शब्दः तु शब्दोऽवधारणे इति सूचितः . जरामरणमोक्षायेति वचन बलात्

कैवल्यमोक्ष इति परम प्रकृतार्थ उपसंहरति । तस्मादिति । जराशब्दस्य वयेवस्याविशेषपरत्वेमरणशब्दस्य प्राणत्यागपरत्वेन निर्जराणाममराणां देवानां कैवल्यप्रसङ्गेन जरामरणशब्दयोरपक्षे विनाशपरतया निश्शेष तदुभयमोक्षस्य प्रकृति मण्डलबहिर्भूतस्थान एव सम्भवात् मुक्तानां परमागतिरित्यादि

वचनान्तरानुगुण्यात्तदनुग्राहकपूर्वोक्त बहूपपत्ति सम्प्रदायानुगुण्यात् । स तु मोक्ष उक्तः, प्रतिबन्धस्तुमोक्षभागितिवचनद्वयस्यस्वपक्षबाधकत्वपरिहारात् । पर पक्षे बाधकत्वसमर्थनाच्छेत्यर्थः इति । सम्प्रदायचन्द्रिकायां तु च्यवनशब्दस्येत्थमर्थोऽनुवादपूर्वकमनुगृहीतं । यच्चोक्तं कैवल्यस्य मोक्षान्तर्भावकल्पनं सर्वेप्यवनधर्माण इति वचनविरुद्धमिति । तदसमीचीनं ऐश्वर्यकैवल्यार्थिनां स्वभिलषितफलसिद्धि पर्यन्तमेवध्यानार्जनप्रणामस्तोत्रमालाकरणादि कर्मणामनुवृत्ततया तादृशधर्मच्युते रत्रप्यवनधर्मशब्देन प्रतिपादितत्वेन वचन

विरोधाभावात् । अत एव भगवद्भाष्यकारैर्ज्ञानिनो हि मदेक प्राप्यत्वस्यमयायोगोनित्यः इतरयोस्तु याक्त्वाभिलषित प्राप्तिमयायोग इत्ययमर्थः प्रतिपादितः । न च योनित्ययोग इत्यत्र नित्यापृथक्सिद्धसंबन्ध एवोच्यत इति वाच्यं । तथा विधसम्बन्धस्य सर्वेषां तुल्यत्वात् । ततश्चध्यानार्जनप्रणामादिभिरेव नित्ययोगो युक्त इति । अत्रायमाशयः । च्यवनं स्वाभिलषित फलनाशः । च्यवनं धर्मयेषान्ते । च्यवन धर्माणः इति पूर्वपक्षार्थमभिप्रेत्यानुवदति । यच्चोक्तमिति । विरुद्धमिति । मोक्षस्य नित्यत्वप्रसिद्धेरितिभावः । च्यवनशब्दो न भावेल्यडन्तः येननाशपरस्यात् । अपितु कर्तरिल्युडन्त परतया नश्वरपरः । धर्मशब्दश्चालौकिक श्रेयस्साधनरूपधर्मपरः । च्यवनशब्दस्य नाशपरत्वे धर्मशब्दस्याधेयसामान्य परत्वे च नाशप्रतियोगि फलवाचिपदाध्याहारो धर्मपदवैयर्थ्य च स्यात् । च्यवनवन्तइत्यपि वक्तुं शक्यत्वात् । च्यवनशब्दस्य नश्वर परत्वे धर्मपदस्य फलपरत्वे च धर्मपदस्य फलवाचित्वा प्रसिद्धयास्वारस्य भङ्ग इत्यभिप्रेत्य परिहरति । तदसमीचीनमिति । मालाकरणादी शब्देन देशवास दीपारोपणादि गृह्यते । ध्यानार्चनादि धर्माणामित्युक्त्वा तादृश धर्मच्युतेरित्युक्त्या, च्यवनधर्मशब्दे नेत्युक्त्या च, च्यवनशब्दोनश्वरपरः । धर्मशब्दोलौकिक श्रेयस्साधनपर इति गम्यते । धर्मशब्देन अलिकिकश्रेयस्साधनस्याधेय सामान्यस्य च तन्त्रेणोपास्थिति सम्भवात् धर्मसामान्यस्यान्वय प्रतियोगित्वेपि पदार्थविधया अलौकिक

श्रेयस्साधनस्योपस्थिति महिम्नातस्यैवान्वयप्रतियोगित्वतात्पर्यावगमत । येतु शिष्टास्त्रय इति श्लोकस्य तेषां ज्ञानीनित्ययुक्तः, तेषामेकान्तिन श्रेष्टाः

इति श्लोकद्वयोक्त ज्ञानिगताधिकारवैषम्यपरत्वात् । च्यवनशब्दस्य

नित्ययुक्तत्वराहित्यपरत्वमेवयुक्तः । च्यवनशब्दस्य फलनाशपरत्वे नित्ययुक्त पदव्याख्यानभाष्यविरोध इत्यभिप्रायेण दूषणान्तरमाह । अत्र एवेति । च्यवनधर्मशब्दस्य स्वाभिलषित साधनपरत्वादेवेत्यर्थः । इतरयोस्तु यावत्स्वाभिलषित प्राप्तिमयायोग इति भाष्यसूक्त्या ऐश्वर्य कैवल्यार्थेनोर्नित्यतिरेक प्रदर्शनेन येतुशिष्टा इति श्लोके फलकामत्व हेतुकं च्यवनधर्मत्वं अहमेवगतिस्तेषामिति गीतोक्त नित्ययुक्तत्व प्रतिपादकपूर्वश्लोकोक्त साध्यसाधनैक्यविरोधिसाधनच्यवनमेव च्यवनधर्मशब्दार्थ इत्यवगमादिति भावः । तेषां ज्ञानीनित्ययुक्तः । तेषामोकान्तिनः श्रेष्ठाः इति निर्धारण षष्टीबलेन नित्ययोगस्ये तरण्यावत्यकत्वं गीताचार्याभिमतमिति भाष्यकाराभिप्रायः । अन्यता अपृथक्सिद्धधार्यत्वरूपप्रसिद्धार्थ एव नित्ययुक्त शब्दार्थतयोच्येत इत्यभिप्रायेणाह । न चेत्यादिना । यद्यपि गुण, विग्रह, विभूति विशिष्टब्रह्मानुभवरूपयावदात्मभावि निरतिशयानन्दयोग एवनित्ययुक्त शब्दार्थः । इति प्रतीयते । तथाप्यसङ्कोचेन ब्रह्मस्वरूपाधिध्यानाच्च न प्रणामादीनामपि ब्रह्मसम्बन्धत्वा विशेषात् नित्ययुक्त शब्दार्थत्वमुचितमित्यभिप्रायेणाह ततश्चेति । च श्शङ्कानिवृत्तौ । प्रणामादिभिरेवेति । इत्थं भूत लक्षणे तृतीया । अवधारणेनापृथक्सिद्धधार्यत्व व्यावर्त्यते इति । इत्थं फलकामाहितेमता इति हेत्वन्वयबलात् प्रतिबुद्धस्तुमोक्षभागिति च्यवन प्रतिकोटतया मोक्षशब्दप्रयोगबलाच्च च्यवनधर्माण इत्यस्यस्वरूप प्रत्युतिरूपसंसारशालिन इति वा धर्मशब्द प्रयोग बलान्मोक्षसाधनधर्मानुषवृत्तिशालिन इति वार्थ इतिस्थितं । अत एव प्रतिबन्धस्तु मोक्षभागिति ज्ञानिन एव मोक्षोक्त्याकैवल्यं न मोक्ष इति शङ्कापि दूरोत्सारिता । कैवल्यार्थिनो निश्शेष संसारनिवृत्ति सद्भावेपि महानन्दरूप मोक्षशब्दरूढयर्थाभावेन ज्ञानिन एव मोक्षोक्ति सम्भवात् । अन्ययाजिज्ञासु शब्दित कैवल्यार्थिनोमधुविद्यान्यायेन प्रकृतिमण्डले कैवल्यानुभवः अनन्तरं ब्रह्मप्राप्तिरितिपक्षेपि कैवल्यार्थिनो मोक्ष सद्भावेन प्रतिबन्धस्तु मोक्षभागिति वचनविरोधप्रसङ्गेन साक्षान्मोक्षभागित्यध्याहारापत्तेर्दुरूद्धरतया मोक्षशब्दरूढयर्थमादायज्ञानिनो वैलक्षिण्योक्ति रित्येवोचितत्वात् । एतस्सर्वमभिसन्धायो पसंहृतं रहस्य एवेके । तस्माज्जरामरण मोक्षसद्भावमपेक्ष्यकैवल्यं मोक्षइत्युक्ते र्नविरोध इति स्वरूपप्रच्युतिरूपसंसार सद्भावेपि कैवल्यानुभवस्यात्तान्तिकापेक्षया विनाशभावरूपमोक्षशब्दांयोगार्थमपेक्ष्य कैवल्यमोक्ष

इत्युक्तिरूपपद्यत इत्यभिप्रायेण जरामरणमोक्षसद्भावमपेक्ष्येत्युक्तमिति

। यच्चोक्तं रहस्यत्रयसारे । मुच्येतार्तस्तथा रोगाच्छ्रुत्वमामादितः कथां । जिज्ञासुर्लभते भक्तिं भक्तो भक्तगतिं लभेत् इत्युक्त्या श्रीगीतायां जिज्ञासुरित्युक्तात्मनिष्ठः क्रमेण ज्ञानीभवति इत्युक्तं भवतीति । तत्रेत्थमुत्तरमुक्तंरहस्यविवेके । मुच्येतार्तस्तथारोगादित्यादि श्लोके आर्तशब्देन नष्टैश्वर्यकामोक्तिं विना आरोग्यं भास्करादिच्छेदित्युक्तारोग्यकामोक्ति वतच्छ्लोकोक्तजिज्ञासुरूक्तया गीतायां जिज्ञासुरित्युक्तात्मनिष्ठः क्रमेणज्ञानीभवतीतिनोक्तमिति । अत्रायमभिप्रायोनुसन्धेयः । जिज्ञासुर्लभतेमित्यत्रार्तोजिज्ञासुरर्थार्थित्युक्तात्मप्राप्तकाम एवगृहीते । एक शब्द प्रत्यभिज्ञानात् ।

आत्मशब्दसमभिव्याहाराद्वा इति शङ्काया मूर्त शब्दसमभिव्याहारबलाद्वेहेतुद्वय मसिद्धमित्याह । मुच्येतार्थस्तथारोगादित्यादिश्लोक । मुच्येतार्त इत्यत्र

अर्तशब्दोननष्टैश्वर्य कामपरः । रोगान्मुच्येतेति फलोक्ति बलेनार्तशब्दस्य गणपरत्वात् । रोगार्तोमुच्यतेरोगादिति वचनान्तसारूप्येण तथैव वक्यव्यत्वाच्च । रोगशब्दस्य ऐश्वर्यनाशपरत्वे लक्षणाप्रसङ्गाच्च । आर्तजिज्ञासुज्ञानिनामुक्तावर्थार्तिनोप्यवश्य वक्तव्यतया तदसङ्गहप्रसङ्गाच्च । तस्मादारोग्यं बास्मरादिच्छेदित्युक्तारोग्रफलस्य मुच्येतार्थ इत्यत्र प्रेत्यभिज्ञानात्तत्रत्यार्त शब्दारोगार्त पर एव । एवमुपक्रमस्यार्तशब्दस्यरोगारतपरत्वसिद्धौ आरोग्यं भास्करादिच्छेदिति श्लोके ईश्वराद्ज्ञानमन्विच्छेत् इत्यनेन मोक्षहेतु तत्वज्ञानार्थिन एव सनोदेवश्शुभयास्मृत्यासंयनक्तु उपायोस्मिहरेस्मृतावित्याद्यनुसारेण विवक्षिततया तत्रतस्यारोग्यकामसमभि व्याहृत तया चाप्रप्युपक्रमप्रतीतारोग्य कामसमभिव्याहारानुसारेण जिज्ञासुशब्देन मोक्षहेतु तत्वज्ञानार्थिन एवार्थतः प्रत्यभिज्ञाश्रयणं युक्तमिति भावः । किञ्चजिज्ञासुर्लभतेभक्तिमित्यतभक्ति शब्द आत्मप्राप्तिहेतुभूतभाक्ति परः । चतुर्विधाभजन्ते मां । भक्ता एव हि ते श्रृता इत्युक्तेः । भक्तो भक्तगतिं लबेदित्यत्राध्यायार्थ श्रवणफलसमर्पक भक्तगति शब्दस्य करणव्युत्पत्या मो७हेतु भक्तिरूप साद्यनपरतया जिज्ञासुर्लभतेभक्तिमित्यत्रा व्यत्मप्राप्तिहेतुभक्ति परत्वमेव भक्तिशब्दस्य युक्तं । इदं च जिज्ञासुशब्दस्मात्म प्राप्तिकामपरत्वमभ्युपगम्योक्तं । वस्तुतस्तु पूर्वोक्तरीत्या जिज्ञासु शब्दोमोक्षहेतु तत्वज्ञानार्थिपरः । भक्तिशब्दस्य भक्त्पाशास्त्राद्वेद्विजनार्दनं भक्त्यात्वनन्ययाशक्य इत्याद्युक्त तत्वज्ञानहेतुभक्तिपरः ।

भक्तोभक्तगतिमित्यत्रभक्तपदद्वयं साक्षान्मोक्षहेतु भूतपरमभक्ति परंगतिशब्दसद्धेतु भूततत्वज्ञान परः । अतो जिज्ञासुर्लभते भक्तिमित्यनेन न साक्षान्मोक्ष साधन भक्तिरूच्यते । येनात्मप्राप्तिकामस्य क्रमेणमोक्षहेतु, भक्तिरूपत्वज्ञान लाभेमोक्षभाग्भवतीति

सिध्येदित्यत्रभिप्रायेणेपसंहरति । श्रीगीतायामिति । आत्मनिष्ठ इति । जिज्ञासुर्लभतेभक्तिमित्यनेन ईश्वराद्ज्ञानमन्विच्छेदित्युक्ततत्वज्ञानार्थिन उक्ततयानिष्टः क्रमेण ज्ञानीभवतीति नोक्तमित्यर्थः । ईश्वराद्ज्ञानमन्विच्छेदित्युक्ततत्वज्ञानार्थिनः जिज्ञासुशब्द प्रसिद्धयभावेपि योगवृत्या जिज्ञासुर्लभते भक्तिमित्यत्र जिज्ञासुशब्दार्थः सम्भवतीत्यभिप्रायेणजिज्ञासोरूक्ततयेत्युक्तमिति । यदपिचोक्तं रहस्यत्रयसारेस्थिरफलाभि निवेशश्चेदिति द्रमिडोपनिषत्सूक्तौ भगवदनुभवस्य नित्यत्वोक्तया तद्वयवच्छेद तयोक्तात्मानुभवोनित्योनभवतीति व्यञ्जितं । विनाशरहितेन्यादिसूक्तो विनाशाभावोक्तिः चातुर्मास्यादि फलविशेष्वक्षयत्वोक्तिवत् बहुकल्पवृत्तित्वोक्तिरपि चिरकालस्थायित्वाभिप्रायेति तत्रेन्थमुतरमुक्तं रहस्य विवेके । स्थिरफलाभिनिवेशश्चेत विनाशरहितेति सूक्तिद्वयेक्रियमाण विश्वामित्रसृष्टिः तत्रत्य पूर्वाचार्यकृतव्याख्यानसूक्तिविरूद्धेति । अत्रायमाशयः । द्रमिडोपनिषदिप्रथमशतके द्वितीय दशक पञ्चमीगाधातावत् द्राविडभाषारूपा संस्कृतभाषयाद्य प्रदर्श्यते । सङ्गोनिवृत्त इति चेत् । मोक्षं प्राप्नोति चेतनः । तन्निरस्य स्थिरेच्छायां निश्चितस्वामिनं भज इति । प्रकृत्यनुरागनिवृत्तिदशायां चेतनोमोक्षं स्वाभाविकानन्दरूपस्वात्ममात्रानुभवानन्द लक्षणं प्राप्तुमिच्छति । अधिगताल्पास्थिरफलकत्वापातप्रतीत्याच चेतनानां प्रथमं त्रिवर्गविषययोत्कटेच्छारूप प्राथमिक प्रावव्यलक्षण प्रतिबन्धक निवृत्तौसत्यमनन्तरमेवोत्कट परिपूर्णब्रह्मानुभवानन्दरूपमोक्षाभिलाषवत ऐहिकफलदोषदर्शनेन ऐहिकफलाभिनिवेषरूप प्रतिबन्धक निवृत्तौ सत्यामामुष्मिक

फलवैलक्षव्यनिर्णयेन ऐन्द्राधिपत्याब्डाधिपत्याभिनिवेशवत् च प्राकृत फलेकर्मोपाधिकत्व दोषदर्शनेन तदभिनिवेशरूपप्रतिबन्धकाभावे सति निरूपाधिकनिरतिशयानन्दरूपस्वात्मानुभववेलक्षण्यज्ञानेन तादृश कैवल्यरूप मोक्षाभिनिवेशस्यापि सम्भवात् । इत्यमेव निरूपाधिक निरतिशयानन्दरूप स्वस्वरूपमात्रानुभवानन्दस्याल्पभोग्य विषयक्तवरूपदोषदर्शनेन तादृशकैवल्य

मोक्षाभिनिवेशरूप प्रतिबन्धक निवर्तनेन तादृशमोक्षं निरस्ययत्रनान्यत्पश्यतीन्यादि श्रृति प्रक्रिययापरिपूर्णब्रह्मानन्दानुभवस्य फलान्तराभिनिवेश प्रतिबन्धमुखेन यं लब्द्धवा पापरंलाभं मन्यतेनाधिकं ततः । इत्युक्तं रीत्या अधिक पुरूषार्थ ज्ञानप्रतिबन्धकज्ञानविषयतया अधिक पुरूषार्थाभिनिवेशभावलक्षणचिन्तस्थैर्यसम्पादकत्वेन तादृशस्यैर्याभिनिवेशेसति । आत्मप्राप्तिपर्यन्तसकल पुरूषार्थाभिनिवेशन्यागेन परिपूर्णब्रह्मनन्दाभवाभिनिवेशो भवति । अन्यार्हशेषत्वलक्षणस्वरूपयाथात्म्य ज्ञाने सति

केवलपरार्थानुभवरूपानिरूपाधिक स्वामिभूतब्रह्मप्राप्तावेवभिनिवेशोभवति । अतस्तादृशब्रह्मप्राप्तिरेव सम्पाद्या इत्युपानदिव्यसूक्तेरभिप्रायः । पञ्चविधपूर्वाचार्यकृतद्रमिडोपनिषब्द्भाष्येष्वनुगृहीतः । तत्प्रदर्शनं चातिविस्यपभियानतन्यते । अत्र मोक्षस्य नित्यत्वेन सर्वसिद्धान्तसिद्धतया मोक्षं प्रात्नोति चेतन इत्यनेनैव आत्मानुभवरूपमोक्षस्य नित्यत्वसिद्धय तन्निरस्यस्थिरेच्छायामित्यनेन आत्मानुभवरूप मोक्षाभिनिवेशं परिव्यज्यास्तिरफलेच्छामिन्यर्थस्यवक्तिमशक्यतया स्थिरेच्छायां

स्थिरचित्तेच्छायां यत्रनान्यत्पश्यति । यं लब्ध्वाचापरं लाभं इत्यादि प्रसिद्ध चित्तस्थैर्यापेक्षयामिति पूर्वाचार्यैरर्थोनुगृहीतः अल्पभोग्यविषयकत्वेनात्मानुभवरूपमोक्षे अभिनिवेशं परित्यज्य स्वरूपरूपगुणविभूतिभिरपरिच्छिन्नानन्तभोग्य विषयकत्वेन चित्तस्थैर्यापादक ब्रह्मानुभवापेक्षयां इत्यर्थ इत्याचार्याणामभिप्रायः । तन्नित्यस्य स्थिरेच्छायामिन्येतद्वयावर्थतया आत्मानुभवस्यानिन्यत्वासिद्धिरिति वचनं आत्मानुभवस्यमोक्षत्वकण्ठोक्ति रूपदिव्यसूक्तिविरूद्धं । उपक्रमस्थमोक्षात्मकण्ठोक्त्यनुसारेणोन्तरसूक्तेश्चित्तस्थैर्यपरत्वेन व्याख्यानसूक्ति विरुद्धश्चेति । अपि च । अनुश्चिन्यस्वामिनं भजेत्यत्रस्वामित्वा तद्भजनं कार्यमितिहेतोर्विवक्षिततया तद्धेतुत्वेन निश्चिन्येत्यनेन आकारत्रयसम्पत्तिपस्वरूपयाथात्म्य ज्ञानुसन्धानस्य विवक्षिततया च स्वरूप विरूद्धमात्मानुभवं परित्यज्यभगवद्भजनं कुर्विति वाक्यार्थोवक्तव्यः । एवं च स्थिरेच्छयामित्यनेन चित्तस्थैर्याभिनिवेशसतीत्यर्थो वर्णनीयः । अस्वामिभोगरूपात्मनुभवस्यस्वरूप विरुद्धतया स्वरूपयाथात्म्य ज्ञानवतः तत्राबिनिवेशं परिन्यक्तस्थैर्याभिनिवेशेसति तं प्रतिस्वाम्येव प्राप्य इत्यध्यवसायं कुर्विति परोपदेश प्रवृत्तेन

परमाचार्येणोपदेशोपपत्तेः । अन्यथास्थिरफलेच्छायां । नित्यफलं भजेन्येव वक्तव्यत्वात् । अन्यच्च निकृतस्सङ्ग इति चेदित्यत्र प्राकृत भोगाभिनिवेशनिवृतावल्पास्थिरत्वादिदोषानुसन्धानस्य हेतुत्वेन विवक्षिततया प्रकृत भोगाभिनिवेशाभावे मोक्षाभिनिवेषो भवतीत्युक्ते मोक्षं प्राप्नोति चेतन इत्यनेन तादृशदोषरहितफलाभिनिवेशोभवतीन्यर्थोवर्णनीयः । अनन्तरं तन्निरस्य स्थिरेच्छायामित्यनेन मोक्षाभिनिेशं परित्यज्य स्थिरफलेच्छायामित्युक्तुक्तिस्थानाविजृभितास्यात् । स्थिरत्वानुसन्धानेनैवमोक्षाभिनिवेशस्य प्रसक्ततया तत्परित्यागेन स्थिरफलाभिनिवेशस्य प्रसक्त्यसम्भवात् । तस्मादात्मनुभवरूप मोक्षे । अथ यत्रान्यत्वश्चन्यच्छृणोत्यन्यद्विजानाति

तदल्पमित्युक्तस्य यो वैभूमातत्सुखं भूमानं भगवोविजाज्ञास इति भूमात्वेव विजिज्ञासितव्य इत्युक्तभूमाशब्दार्थ बहुत्व

प्रतिकोटि भूतस्य भोग्यन्युनसख्यात्वलक्षणाल्पत्वस्य अनुसन्धानेनाभिनिवेशे यत्र नान्यत्पश्यति नान्यच्छृणोति नात्यद्विजानाति सभूमा इत्युक्ता परिमितत्वरूपभोग्यबहुत्व विशिष्ठ ब्रह्मानुभवे यं लब्ध्वा चापरंलाभं मन्यतेनाधिकं ततः । इत्युक्तरीत्या चित्तस्थैर्यापादके अभिनिवेशोभवतीति सर्वेरपि पूर्वाचार्यैरनुगृहीत एवार्थः । तन्निरस्य स्थिरेच्छायामित्यस्यानुसन्धेय इति । इतरच्च । जीवस्वरूपं तावत् स्वाभाविकनिरतिशयानन्दरूपमिति तावत्सम्प्रतिपन्नं । अचेनतस्वरूपमौपाधिक भोग्यमिति च । इत्थं चिदचिद्विवेकशालिनो भोग्यनीत्यत्वेन प्राकृतभोगानित्यत्व निश्चयेन तदभिनिवेशे निवृत्ते यमनियमादि क्रमेण स्वभाविकजीवस्वरूपभोग्यता विर्भावो भवतीति निश्चयवतस्वाभाविक भोग्यताविर्भाव प्रतिबन्धकसकलकर्म निवृत्तौ भोग्यताया नित्यत्वेन तदाविर्भावोपि नित्य इति निश्चयोदयेन जीवात्मानुभवरूपकैवल्य भोगात्मक मोक्षे आभिनिवेशो भवतीत्युक्तेन कैवल्य भोगस्यस्थिरफलेच्छायामिति वक्ष्यमाण स्थिरत्वव्यावर्त्यतया नित्यत्वमभिप्रेत्यत६ाभिनिवेशं परित्यज्य स्थिरफलेच्छायामिति वक्तु शक्यं । नित्यत्वानुसन्धानस्य कैवल्यभोगाभिनिवेशद्वेतुत्वेन पूर्वसूक्तयाभिप्रेततया अनित्यत्वानुसन्धानेन तदभिनिवेशा भावलक्षणतत्परित्यागोक्तेर्व्याहतत्वात् । न च मानुषानन्द प्रभृतिचतुर्मखानन्दपर्यन्तानामनित्यत्वेपि स्वरूपतारतम्यवच्छिदद्भोभयोस्स्वरूप तारतम्यसद्भावेन तदनुसन्धानेना चिद्भोगादिनिवेशं निवा

आत्मानुभवभोगाभिनिवेशस्सम्भवतीति वाच्यं । स्वाभाविकात्मभोग्यताविर्भावस्य निश्शेषप्रतिबन्धक निवृत्तो सत्यामुत्पन्यवश्यं भावेनानन्तरन्तन्नाशकाभावेन च चिदचिद्भोगयोर्नित्यत्वानित्यत्वानुसन्धानस्यापि विनिगमनाविरद्देणन्यागोपादानद्देतुत्वावश्यं भावेन तद्धेतुत्वस्यापि विनिगमनाविरद्देणैव निवृत्तस्सङ्ग इति चैन्मोक्षं प्राप्नोति चेतन इति पूर्वसूक्तयभिप्रेतत्वावश्यकत्वादिति दिक् । इतरच्च । स्थिरेच्छायामिति । स्थिरवदव्यावर्त्यतया मोक्षं प्राप्नोति चेतन इत्युक्तात्मानुभवस्यास्थिरत्वसिद्धिरितिनोक्तेसम्भवमर्हाति मधुविद्यान्यायेन आत्मानुभवानन्तरं ब्रह्मानुभव इत्यभ्युपगच्छतां परमपदेष्यात्मानुभव सत्वेन आत्मानुभवस्ययावदात्मभावित्वात् । आत्ममात्रानुभवो यावदात्मभावि न भवतीति चेत् । नैतावता आत्मानुभवस्यानित्यत्वं, आत्मानुभवस्य प्रथमं ब्रह्मानुभवसाहित्यं विना अनन्तरं ब्रह्मानुभव साहित्येन अधिकं तु प्रविष्टं न तु तद्धानिरिति न्यायेन अभिनिवेश हेतुकनश्वरत्व ज्ञानाभावेनपारिभाषिक ब्रह्मानुभवरहितात्मानुभवास्थिरत्व ज्ञानस्याप्रयोजकतया विलम्बा

सहस्याब्रह्मानुभवरहितात्मानुभवेच्छानभवतीति तथाव्यात्मानुभवास्थिरत्वज्ञानस्य तदभिनिवेशनिवर्तकत्वासिद्धेः । अस्माकं तु मोक्षं प्राप्नोति चेतन इति मोक्षपद सूचितनित्यत्व ज्ञानस्य स्वरूपानुरूपपरि पूर्णब्रह्मनुभव विरोधित्व ज्ञानमुखेन

आत्मानुभवाभिनिवेशनिवर्तकतया तन्निरस्य स्थिरेच्छायामिति सूक्ति स्सुघटिता । तस्मादार्तोजिज्ञासुरित्युक्त जिज्ञासोरात्मानुभवः प्राकृतोपि पुनरावृत्ति रूप इत्यभ्युपगच्छतां मोक्षं प्राप्नोति चेतनः । तन्निरस्य स्थितेच्छाचेदिति वाक्यानन्वयापत्याजिज्ञासोरात्मानुभवो अप्राकृतो तएव नित्यश्चेत्यभ्युपगम्य वाक्यान्वयः उपपादनीयः । यद्यपि भूमविद्यान्तर्गत प्राण विद्यनिष्टात्मानुभवस्य पुनरावृत्ति रूपतया अत्रनश्वरत्व ज्ञानमभिनिवेशनिवर्तकमति वक्तुं शक्यं । तथापि निवृत्तस्सङ्ग

इति चेदित्युक्त प्राकृतभोगाभिनिवेशाभावान्तर्गततया प्राणविद्यानिष्टात्मानुभवाभिनिवेशाभावस्य मोक्ष प्राप्नोति चेतन इति प्रतियोगि प्रसक्ति पूर्वकं तन्निरस्येत्यनेन विवक्षायां पौनरूक्त्यापत्तेः । प्राणविद्या निष्टात्मानुभवस्यनश्वरत्व ज्ञान निबन्धनाभिविवेशा भावोनतन्निरस्येन्यस्यार्थः । किञ्च जिज्ञास्वत्मानुभवाभिनिवेशाभावस्यावस्यवक्तव्यतया तन्निरस्येत्यनेन मोक्षं प्राप्नोति चेतन

इति प्रतियोगिप्रसक्ति पूर्वकं विवक्षणीयः। तत्र च पूर्वोक्तरीत्यानश्वरत्व ज्ञानस्यद्देतुत्वासम्भवात् मोक्षं प्राप्नोति चेतन इत्यनेन अप्राकृतकैवल्यमोक्षाभिनिवेशस्य प्रसक्तिपीर्वकं तन्निरस्येत्यनेन तादृशात्मानुभवे अपरिपूर्णत्वस्वरूपविरूद्धत्व ज्ञानद्देतुकं निषेधं विवक्षित्वा स्थिरेच्छायामित्यनेन मनस्थैर्यापादकफलेच्छाया मित्ये वार्थोविवक्षणीयः । अपि च भवत्पक्षेजिज्ञासोरात्मानु भवस्यापि प्राकृत भोगत्वेननिवृत्तस्सङ्ग इति चेदित्यनेनैव निषिद्धतया पुनस्तस्य मोक्षं प्राप्नोति चेतन इति प्रसक्ति पूर्वकं तन्निरस्येत्यनेन निषेधोन भवति, तस्मान्निवृत्तस्सङ्ग इति चेदित्यनेन कृत्स्न प्राकृत भोगाभिनिवेशाभावमुक्तवामोक्षं प्राप्नोति चेतन
इत्यनेनाप्राकृतनित्यात्मानुभवरूपकैवल्याभिनिवेशप्रसक्ति पूर्वकं तन्निरस्येत्यनेन निषेधमुक्तवा स्थिरेच्छायामिति चितस्थैर्यापादक फलाभिनिवेश एवोच्यत इति दिक । तदेतत्सर्व अभिसन्धायसर्वज्ञेन कलिजित जगदाचार्येण साम्प्रदायिकार्थोऽनुगृहीतः । योगाभ्यासेनस्वरूपं प्रकाशते । तस्यनित्यज्ञानान्तलक्षण तया एतदेवानुभवितुं योग्यमिति स्वविषये अभिनिवेशं जनयतीति । अनेन मोक्षं प्राप्नोति चेतन इत्यस्य अर्तोऽनुगृहीतः । स्वाभाविकस्य धर्मस्य प्रतिबन्धकाभावेनाविर्भावे सति पुनस्तस्यनाशोनसम्भवतीत्यभिप्रायेण नित्यज्ञानन्दलक्षणत्वेनेत्यत्र नित्यपद प्रयोगः ।

स्वरूपमणुमात्रंस्यात् ज्ञानानन्दैकलक्षणमिति प्रमाणस्मारणाय ज्ञानानन्दलक्षणत्वेनेत्युक्तं । स्थिरेच्छायामित्यस्यस्थैर्याभिनिवेशेसतिस्वप्राप्तावितो अधिकोऽअनुभवोस्तीति निश्चयविरोध स्थिरपुरुषाभिनिवेशेसतीत्यर्थोनुगृहीतः । स्थिरेच्छायामिति सूक्तौस्थिरपदं न फलपरं । अपि तु चित्तपरं । चित्तस्य स्वतसिद्धत्वाद्विशेषणेच्छाभिप्रेतेति सूचयितुं स्थैर्याभिनिवेशेसतीत्यनुगृहीतं । यं लब्ध्वाचापरं लाभमिति वचनानु सारेण नित्यसिद्धस्यचित्तस्यस्थैर्यापेक्षापि न सम्भवतीति शङ्का पिरहारार्थं किञ्चित् फललाभेच्छावतश्चितस्य तदधिकत्वेन फलान्तरानुसन्धानपूर्वकं तदिच्छारहितत्वं स्थैर्यमित्यभिप्रायेण फलितार्थ उक्तः । स्वप्राप्ताविति । स्वपदं वक्ष्यमाणस्थिरपुरुषार्थपरं, स्वप्राप्तौ सत्यामित्यर्थः । अनेन यंलब्ध्वेत्यर्थ उक्तः । नाधिकं तत इति तच्छब्देन यंलब्ध्वेत्युक्तयच्चब्दार्थ एव परामृश्यते इत्यभिप्रायेण इतोधिक इत्युक्तं । लाभ शब्दोलभ्यमानपर इत्यभिप्रायेणानुभव इत्युक्तं । निश्चयविरोधित्वं निश्चय

प्रतिबन्धकज्ञानविषयत्वं । प्रतिबन्धकं च ज्ञानं स्वस्यसर्वोत्कृष्टत्वेन ज्ञानमेता दृशास्थिरपुरुषार्थाभिनिवेशेसतीत्यनेन नित्यशस्थिरपुरुषार्थ एव स्थिरपदेन व्यावर्त्यते । नत्वस्थिरपुरुषार्थ इति सूचितं । षष्ठशतकेनवमदशके दशम सूक्तिरपि संस्कृतरूपेणानूद्यप्रदर्श्यते । अह्नस्वादीर्घाविनश्यत् अन्तकल्पसङ्कोचविकारारहितापरिमितानन्दः प्राप्तोपि हे आश्चर्यभूतकालान्तरानन्वितकेवलत्वदर्थशेषवृत्तिहेतुभूताल्पकालमपि पर्यालोचने अर्हति किं बतेति । अत्रायं पूर्वाचार्यै र्व्याख्यानपञ्चकानुगृहीताभिप्रायः ।
पूर्वत्राण्डाधिपत्यनैश्वर्यस्याल्पास्थिरत्वादोषदुष्टतयात्याज्यत्वमुक्तम् । तर्हि अल्पास्थिरत्वादि दोषाभावात् केवलात्मानुभवरूपकैवल्यमोक्ष एव प्राप्तुं शक्य इति किमर्थं भगवत्प्राप्तिः प्रार्थ्यत इति

शङ्कायां स्वरूपानुरूपशेषवृत्तिपर्यवसायित्वात् भगवत्प्राप्तेः तादृशकैंकर्यानुविद्धक्षणकालस्यापि तदनुबन्धित्वेनैव नित्यकैवल्य भोगापेक्षयापि
प्रार्थनीयत्वाच्चकेवलपदार्थभगवत्कैंकर्यपर्यवसायिकेवलपरार्थानुभवरूपभगवत्प्राप्तिरेव प्रार्थ्यत इत्यभिप्रायेणाह । अह्नस्वेत्यादि । अह्नस्वीदीर्घशब्दाभ्यामचित्स्वरूपस्यैव
कर्माधीनसङ्कोचविकासलक्षणविकाराभावः प्राप्तस्यात्मानुभवस्य प्रदर्शितः । अविनश्यदित्यनेन घटत्वाद्यवस्थावत् आत्मानन्दानुभवस्य स्वरूपासत्वलक्षणनिरन्वयविनाशाभाव उक्तः पूर्वधर्मिणि सत्येव धर्मविनाशरूपनान्वयविनाशाभाव उक्त इति भेदः । अनन्तकल्पसङ्कोचविकासराहित्यस्य यावत्कालभावोक्त्यापूर्वोक्तसान्वय विनाशाभावस्य नित्यत्वं सूचितम् । अरिमित्यनेन केवलात्मानुभवानन्दस्य किञ्चिदानन्दा

मोक्षयानिकृष्टत्वेन अनिश्चितत्वामुक्तम् ।
केवलात्मानुभवानन्दब्रह्मानुभवानन्दयोर्निलतरनीलतमार्मत्यादि प्रतीत्यारूपाणामिव स्वरूपतारतम्याभावात् । एवं केवलात्मानुभवस्याल्पभोग्यविषयकत्वेननत्याज्यता । अपि तु केवलपरार्थकैंकर्यविषयकत्वे नेत्यभिप्रेन्य भगवन्तं प्रत्याह हो आश्चर्यभूतेति । नित्यत्मानुभवादपि क्षणकालावच्छिन्न परमत्यध्यवसाय हेतुभूत परिपूर्णभोग्यत्वसर्वस्वामित्वलक्षणापूर्वाकारयुक्तेत्यर्थः । सालान्तरानन्वितत्वं शेषवृत्ति विशेषणं, क्षणातिरिक्त कालानन्वितेत्यर्थः । अनेन मुमुक्षुत्वावस्थायां विरोधिभूयिष्ठतया

अल्पकालावच्छिन्नाया अपिशेष कृतेरेवात्मानुभवानन्दापेक्षया प्रार्थनीयता सूचिता । हेतुभूतेत्यनेन कालस्यावच्छेदकत्वेनहेतुत्वं विवक्षितम् । पर्यालोचने केवलपदार्थशेषवृत्तेः
भगवत्प्रियतमत्वपर्यालोचने अनुभव जनितप्रीतिकारितशेषवृत्यपेक्षया
स्वस्वामिभावसम्बन्धानुसन्धानजनितशेषकृतेर्भगवत्प्रियतमत्वपर्यालोचने चेत्यर्थः । प्रमाणोपपत्तिभिः गुणापर्यालोचनमिहविवक्षितम् । अल्पकालमप्यर्हति किमिति राघवोर्हाति वैदेहीमितवत्
अल्पकालर्हत्वं भोग्यतांशे अल्पकालसादृश्यप्रतियोगिकत्वेनानुसन्धेयत्वं तन्नास्तीत्यर्थः । बतेत्यनेन रत्नकरीष वैषम्यवदिपदेशानर्हस्यार्थस्योपदेश जनितविषादोद्योत्यते । केवलपरार्थानुभवकैंकर्ययोः भगवत्प्रियतमत्वस्य मूलमन्त्र मन्त्ररत्नादि सुदृढप्रमाण प्रसिद्धन्वादिति । इत्थं
पूर्वसूक्तिष्वल्पाक्षरत्वादिदोषेण निर्वर्त्यत्वेन प्रार्थितैश्वर्यापेक्षया तादृशदोषराहित्यलक्षणोत्कर्षे सत्येव कैवल्यस्य प्रार्थनीयत्वेन प्रसक्तेर्वक्तव्यतया तन्निषेधपरसूक्तौ कैवल्यप्रार्थनीयत्व प्रसंजकाप्रंस्वत्वादि विशेषणपञ्चकस्य वायुष्चान्तरिक्षंचेत्यादिवाच्चिरकालस्थायित्वमुखेन प्रशंसापरत्वे
महावाक्यस्याप्रसक्त प्रतिषेधापत्यामूकत्वापत्तिः पदषट्कस्यलक्षणापत्तिः ।
पदषट्करूपनित्यत्वाभ्यासलक्षण तात्पर्यालिङ्गविशेधापत्तिश्चेतिदूषणत्रयं
स्फुटमित्यभिप्रेत्यस्थिरेच्छायामितिसूक्तौ अह्नस्वेत्यादि सूक्तौ च क्रियमाणाविश्वामित्र सृष्टिस्तत्रत्यव्यख्यानपञ्चकसूक्ति विरुद्धेति संग्रहेणानुग्रहीतम् । विश्वामित्र सृष्टीरित्यनेन स्थिरेच्छायामित्यस्य नित्यफलेच्छायामित्यर्थकल्पनं
अह्नस्वेत्यादेश्चिरकालस्थायीतार्थकल्पनञ्चविवक्षितम् । असाम्प्रदायिकस्यापि किमर्थंकल्पनमिति शङ्कापरिहर्तुं विश्वामित्र पदप्रयोगकृतः । अन्येन्द्रकं भुवनमन्यदनिन्द्रकं वा कर्तुं
क्षमेकविरभूदयमन्ववाये इत्युक्तरीत्या प्रमाणोपपत्तिसम्प्रदाय विरुद्धस्यापि पक्षस्यास्वरूदृयवादेन साधकबाधकपरिहार प्रदर्शनं पूर्वाचार्येष्वेव कैश्चित्प्रदार्थीतस्य पक्षस्यान्यन्योक्त्य सम्भवपरिहारार्थं वंशमाहात्मप्रसिद्धमितिभावः । प्रप

ञ्चितं चैतद्रहस्यविवेके । कैवल्यं मुक्तिरिति अनित्यमिति च । दिव्यसूरयः पूर्वाचार्यश्च सूक्त्यन्तरेषु तद्वयाख्यान सूक्तिषुचानुगृहीतवन्तः । कथमिति चेत् सङ्कोचोमोक्ष इति वदतो ज्ञाननिनोपि आत्मज्ञानिनोपि इति ममादुःखं मूलोच्छेदेन निवर्त्य जन्मापगमानन्तरं प्राप्य कैवल्यरूपं महादुःखं सवासनं निवर्त्य पूर्वकालीनस्थितिरेवोत्कृष्टेति ज्ञापको हि

एतदपकर्षः । तदनन्तरं यत्किञ्चित्शरीर परिगृहं कृथ्वापि भगवत्समाश्रयणं कर्तृं योग्यतास्तिद्दि । इदं द्दिनित्यविनाशरूपमिति ऐश्वर्यपदस्थिरं न भवतीद्दीदंनित्यं भवति हीत्यात्मलाभार्थमगत्योपासीनेषु केवलेष्वागत्य स्फुरत सुतान् क्षिपति शरणीभूतेत्यादिति च । श्रीपादोप्रणम्यपापिष्टस्यैव भगवद्विषत्वाभावादात्मप्राप्तिरपुरुषार्थः । ऐश्वर्यवतास्स्थिरत्वाभावात् । नित्यापुरुषार्थ इत्यर्थ इति च । यत्किञ्चिदपि नास्तीत्यादि । एतदात्मानुभवसुखादित्कृष्टभूतं किञ्चिन्नास्तीति । तस्मादुत्कृष्ट भगवदनुभवसुखसत्वेपि एतदेवमत्वाकर्ण्य वृद्धिकामस्य कर्णौसदाच्छित्वाप्राक्त न योग्यतामप्यपोद्दयवर्तनेनेव भगवत्समाश्रयणयोग्यसंसारे शब्दादिविषयानुभवमपि हित्वापर्तनं इति च । स एव मोक्षः निवृत्तस्सङ्गइत्युक्तेप्राप्नोति मोक्षं चेतन इति प्राकृतसहाभिनिवेशकृते आत्मप्राप्तिलक्षणमोक्षो भवति । तदर्थमिति कर्तृव्यंनास्ति मोक्षो भवति । तत्प्रकारतया आत्मवस्त्वनुसन्धानन्मुखेन एतत्प्राप्यत्वेन ह्ययमनुसन्धत्ते यावत्पर्यन्तंगन्तुमशक्यातद्भोगतांदृष्ट्वा त्रैवस्तितानामपि योग्यं भवतीत्याह स एव मोक्षः । पूर्वोक्तात्मप्राप्तिरेवमोक्षः । मोक्षपुरुषार्थगतानन्दस्वरूपमपि सः मोक्षसिद्धौलब्धं सुखमपि स आत्मानुभव इति च । मङ्गलाशासन प्रबन्ध व्याख्याने कैवल्यार्थिन अह्नयते । तैरूपास्यनिर्वर्त्यमानंमोक्षस्वरूपं अनर्थ इति प्रतिबातमस्यन्मोक्षस्य प्रत्यासन्नतया तंत्यक्त्वा आगच्छतेत्याहा अनन्तरं स्वस्वरूपापाप्तेर्मोक्षरूपतया तस्मादुनरत्रगतिर्नास्ति पूर्वत्रागतिर्नास्ति तं तमुद्भवद्योग्यताया अपि नाशकं हि जरामरणमोक्षायेति प्रकृति विनिर्मुक्तात्मानुभवं हि मोक्षत्वे नानुसन्धायस्थीयते इति च तदीयव्याख्यानान्तरे आत्मप्राप्तिरूत्कृष्टेतिबुद्धयानाह्वयते समोक्षोऽनर्थ इति बुद्धिमत्वादस्य तन्मोक्षप्राप्तौतस्मात्प्रत्युतसाम्भवात् । ऐश्वर्यकामस्य कालान्तरेपि भगवत्सम्बन्धयोग्यता सत्वात् तद्योग्यताया अप्यस्यापगमात्, इति च इत्यादिना महताग्रन्थेन । एतद्विवरणं च विस्तरभियानतन्यते । अत्रतावद्दिव्यसूरयः । पूर्वाचार्याश्चेत्यनेनदिव्यसूरिसूक्तेस्सद्वयाख्यानसूक्तेश्चानुपदमुदाहरिष्यन्त इति सूचितं ।

सूक्तन्तरेष्वित्यनेनोदाहृतसूक्तिद्वयापेक्षयान्यत्वं सूचितं । चतुर्थशतक प्रथमदसकधसमगा

धासूक्ति सङ्कोचोमोक्ष इति वदतो ज्ञानिनोपीत्युपात्ता, तत्रज्ञानिपदे न ज्ञानी च भरतर्षबेत्युक्त ज्ञानिग्रहणव्यावर्त्यर्थमात्मज्ञानिनोपीति व्याख्यातम् । अत्र

पूर्वगाधायामैश्वर्यस्य कात्स्नैनाल्पास्थिरत्वोक्त्या तदुपरि कैवल्यभोगस्य प्रसज्यप्रतिषेधेन नित्यत्वं मोक्षत्वोक्तया प्राकृतभोगबद्दिर्भूतत्वं । सङ्कुचितभोगमोक्ष इति वदतोज्ञानिनोपीत्युक्तया स्वात्ममात्रानुभवरूपकैवल्यस्य अपरिमित भोग्यानुरूपसाक्षान्मोक्षापेक्षया वैलक्षण्यं च सूचितमिति तात्पर्यं । ज्ञानिनोपीति इति शब्दः पूर्वोपात्त मूल तद्वयाख्यानसूक्त्युपादानपरः । अनन्तरं सप्तमशतक पञ्चमदशकदशम गाधासूक्तिमुपादत्ते महादुःखं मूलोच्छेदन निवर्त्येति । तद्वयाख्यान सूक्ति मुपादत्ते जन्मापगमानन्तरमित्यादि । जन्मापगमानन्तरमित्यनेन तस्यामेव

सूक्तौजन्मजरामरणरूपदुःखनिवृत्युक्ति पूर्वकं महादुःखस्य प्रसज्यप्रतिषेधे न कैवल्यमोक्ष एव महादुःखशब्दार्थ िति सूचितम् । कैवल्यस्य महादुःखन्वमुपपादयति पूर्वकालीनेति । अण्डादिपत्यान्तबोगवत्तयास्थितिरित्यर्थः . एतदपकर्ष इति । महादुःखत्वरूपकैवल्यापकर्ष इत्यर्थः । पूर्वभोगत्वाभावात् प्राप्तभोगत्वाभावाच्च, साक्षान्मोक्षार्थ्यपेक्षया कैवल्यभोगस्यप्रतिकूलत्वेन दुःखरूपत्वं, नित्यत्वेन महादुःखरूपत्वं चोपपद्यते । अत एव चतुर्थशतकनवमदशकदशमगाधायां प्राकृतभोगोक्त्यनन्तरं दुर्विज्ञेयापरिच्छेद्याल्पानन्दंत्यक्तवानिति कैवल्यस्य निरतिशयानन्दत्वं नित्यत्वं भोग्याव्यत्वं चोक्त्वात्याज्यन्वमुक्तम् । अत एव च प्रथमशतकद्वितीयदशकपञ्चमगाधायां स्थिरेच्छायां स्वामिनं भजेत्यनुगृहीतमितिभावः । अनन्तरं नित्यत्वेन महादुःखत्वमुपपादयन्नेतदपकर्षस्य पूर्वास्थितेरुत्कर्षज्ञापकत्वं विवृणोति । तस्यानन्तरमिति वाक्यद्वयेन तस्य ऐश्वर्यार्थेन इत्यर्थः । प्राप्तशेषिभोगत्वा भावेन कैवल्यभोगस्यव्यपगतप्राणात्मेत्यनुगृहीतरीत्या प्रामवियोगरूपत्वादिदं हि नित्यविनाशरूपमित्युक्तं । इदं कैवल्यरूपदुःखमित्यर्थः । नित्यविनाशरूपमितीति शब्दः पूर्ववत् मूलतद्वयाख्यानसूक्तयुपादान परः । अनन्तरमष्टमशतक तृतीयदशकद्वितीयगाधावतारिकासूक्तिमुपादत्तो ऐश्वर्यवदास्थिरं न भवतिद्दीदमित्यादिना गगनादिवत् नित्यत्वलं विनाचिरकालस्थायित्व पर्यवसानं वारयितुमाह । नित्यं भवतिहीति । भवतिहीत्यनन्तरमिति शब्दस्य इतिमत्वेत्येर्थः । इतिमत्वागत्यस्फुरात्स्वित्यन्वयः । अप्रसक्तप्रतिषेधत्व परिहाराय आगन्त्रृणां कैवल्येनित्यत्वानुसन्धानं मूलाभिप्रेमितिभावः । शरणीभूत चतुर्वेदशास्त्राव्यप्राप्त्योपकरणवत् बहुसेनानिश्शेषनिवर्तकज्जलच्चक्ररूपरक्षक दृढायुधधारीश्वर

शेषभूता च यं मरणावि

र्भावदृढतद्वयाधिजराइत्येवमीदीनि निरस्याम इति मूलसूक्तिश्शरणीभूतेत्यादीत्यनेन अभिप्रेता । अस्याङ्गाधायां श्रीपराङ्कुशाख्यदिव्यसूरिः परानर्थं स्वनर्थत्वेनमन्यमानः कैवल्यार्थिनामुत्कर्षं व्यतिरेकलक्षणयाकाकुसूक्त्या स्वगतत्वेनानुसन्दधानः कैवल्यार्थिनः प्रतिक्षिपतीत्याभिप्रेतं । ऐश्वर्यतत्साधन प्रतिपादकतया चेतनसंरक्षक चतुर्विधवेदशास्त्राणिमहामोहाकान्यापि परित्यज्य भगवदुपसनान्तिमस्मृति रूपशेषवृत्तिं कुर्वन्तोपि वयं जन्मादिषद्भाव विकारनिवृत्तिमात्रं सम्पादितवन्तो अभवाम । अतो महापूज्यावयं अत्यन्त निकृष्टाएवेति तात्पर्यमिति भावः । इतिचेत्यनेन पूर्वसूक्तिद्वयोपादानं समुच्चीयते अनन्तरं अष्टमशतकचरमदशक द्वितीयगाधां सूक्तिलेशोपादानेनस्मारयन् प्रकृतोपि युक्तां तद्वयाख्यानसूक्ति, मप्युपादत्ते श्रीपादापिव्यादिना । श्रीपादौ प्रणम्य पापिष्ठस्यैवेति सूक्तिलेशोपादानं । आश्चर्य भूतलोकाधिपत्य लाभेपि प्रकृतिमण्डलमुत्तीर्यस्वस्वात्मानुभवमात्रलाभेपि वर्षुकवलाहकसदृशप्रीविह्रहाविशिष्टस्वामिनः पुष्पसंदर्शक लकृतिचरणयोभ्य स्वयमेव कैंकर्यसीमानिष्ठानां श्रीपादौ प्रणम्य ऐहिकफलभूतास्मल्लब्धानन्दमर्हति किं पापिष्ठस्येति सूक्तिस्मारणा य श्रीपादौ प्रणम्यवापिष्ठस्यैवेत्युक्तं । एवेतिपादपूरणार्थमव्ययं । उपान्त मूलव्याख्यानसूक्तिमाह भगवद्विषयत्वाभावादिति । भगवतशेषत्वस्यानुभव जनितप्रीतिकारितप्राप्तशेषि भगवत्पर्यन्तशेषवृत्तित्वमात्मानुभवस्याप्राप्तविषयत्वं चाभिप्रेत्य भगवद्विषयत्वाभावदात्मानुभवमपुरुषार्थ इत्युक्तं । आश्चर्यभूत त्रैलोक्यलाभोक्ति पूर्वकं प्रकृतेरूर्ध्वङ्गत्वास्वस्वात्ममात्रानु भवलाभोक्त्या वापिष्ठस्येत्यनेन रत्नकनकरीष वैषम्यवदुपदेशानर्हः । कैवल्यानुभवस्यभागपतशेषत्व साम्यनिषेध इत्युक्तया चात्मानुभवस्य नित्यापुरुषार्थत्वं लभ्यत इत्यभिप्रायेणाह ऐश्वर्यवदिति । इति चेति च

शब्देन सूक्तित्रयोपादानं समुच्चीयते अथ नवमशतकप्रथमदशकनवमगाधासूक्तिमूपादत्ते ।
यत्किञ्चिदपि नास्तीत्यादिति । यत्किञ्चिदपि नास्न्याधिकं तस्मादिति
तदिष्ट्वाकर्णावृद्धिकामकर्णाच्छेदं प्राप्यहीनवृत्यासुखेन वर्तनमपि गच्छतीति मूलसूक्तिः ।
तद्वयाख्यान सूक्तिमूपादत्ते ।

एतदात्मानुभवसुखादिति तस्मादिति पदं बुद्धिस्वात्मानुभव सुखवरमिति भावः ।
तदिष्ट्वेत्यस्यार्थमाह । एतदेवमत्वेति । अवधारणेनेति शब्दद्वयलब्धं

सदामननं विवक्षितं । इतिमत्वेत्यनेनोपदेशेनिरर्तक इत्युक्तरीत्या तस्मादधिकन्नास्तीत्यभिमान
मात्रमिति गम्यत इत्याह । तस्मादुत्कृष्टभगवदनुभवसुखसत्वेपीति तत्पदमात्मानुभवसुखपरं ।
ऐश्वर्यानुभवस्यानुत्यतया तन्निष्ठस्य कालान्तरे भगवदनुभवयोग्यता

सत्वात् तद्योग्यतापादकंहेयसुखविशिष्टतयावर्तनरूपजीवनमपिगच्छतीतिवक्ष्यमाणत्वेन
मूलेतस्मादिति पदेन बुद्धिस्ययोग्यपरामर्शिनात्मानुभवसुखं लभ्यत इति भावः । आत्मानुभव
सुखादधिकं नास्तीति मननस्यभूषणधारणायोग्यता पादकर्णावृद्धिकामकर्णाच्छेदनत्वरूपणादपि
लाभोभिप्रेतः । अनयाकूक्तया कैवल्यनित्यत्वं सूचितमिति तात्पर्यं । वर्तनचेति च शब्दः पूर्ववत् ।
अनन्तरमष्टमशतकाष्टमदशकषष्ठसप्तमसूक्ति तद्वयाख्यान सूक्तिः कैवल्यनित्यत्व
संवाददाढर्यार्थमुपादास्यान्षष्टगाधा सूक्तिं तावदुपादत्ते स एव मोक्ष इति । तत्पदं तस्यामेवगाधायां
तस्मिन्नेवदिनेतास्मिन्मुहूर्ते प्रकृकिप्राकृत सङ्गमोक्षो भवतीति पूर्ववाक्योपात्त प्रकृतिप्राकृत
सङ्गनिवृत्तिः परामृश्यते । अस्य च वाक्यस्य मोक्षो भवतीतिमूलसूक्त्यर्थमभिप्रेत्य स एव मोक्ष
इति पर्थमसूक्तेःभिन्नमुवाक्यमुखेन विवरणेपरं सूक्तिं उपादत्ते सनिवृत्तस्सङ्ग इत्यादि वाक्यद्वयेन ।
मोक्षस्वात्मानुभवरूपस्य प्रकृतिप्राकृतं सङ्गनिवृत्तिमात्ररूपत्वं
प्रथमशतकद्वितीयदशकपञ्चमगाधासूक्तिसंवादनप्रदर्शन मुखेन विवृणोति । निवृत्तस्सङ्ग इति प्रथम
व्याख्येन । चेतन इत्यन्तं संवादसूक्तिः । चेतनइतीतिशब्देन संवादसूक्तयुपादानं
कृतमित्युक्तरूत्येत्यर्थः । उपात्तसूक्तेरर्थमाह प्राकृतेति । स एव मोक्ष इति । प्रकृतसूक्तौ
अवधारणार्थमाह तदर्थमितीति, द्वितीयवाक्येन तदर्थत्वेन किञ्चित्कर्तव्यं नास्तीत्यर्थः । तच्छब्द
आत्मानुभवरूपमोक्षपरः । तत्रत्योत्तरसूक्तिमूपादत्तेमोक्षो भवतीति । कैवल्यमोक्षलाभेन
साक्षान्मोक्षलाभः कथमुच्यत इत्याशङ्कय परिपूर्णब्रह्मानुभवान्तर्गत प्रकृतिवियुक्तात्मानुभव एव
साक्षान्मोक्षत्वेनात्रविवक्षित इत्यभिप्रायेणाह तत्प्रकारतयेति । निरतिशयानन्दरूपमपिजीवात्मस्वरूपं
गुणविग्रहादिवत् भगवदपृथक्सिद्धविशेषणरूपभोग्यत्वेनानुसन्धायेत्यर्थः । तन्मुखेनेति ।
भोग्यभूतत्वस्वरूप विशेषणतया भोग्यत्वानुसन्धानमुखेनेत्यर्थः । एतत् कैवल्यमोक्षसुखमित्यर्थः ।
प्राप्यत्वेन

भोग्यतयानुभाव्यत्वेनेत्यर्थः । हि शब्दो हेतौ । अयं श्रीशठकोपदिव्यसूरित्यर्थः । अनुसन्धत्वे
अस्यांगाधायामिति भावः । तर्हि साक्षान्मोक्ष आत्मप्रधानकानुभवरूपकैवल्यभोगाभावात् कथं तस्य
परमपुरुषार्थत्वमित्याशङ्कय विशेषणतयात्मानुभवस्यापि प्राधान्येनात्मानुभवरूपकैवल्यापेक्षया
भोग्यत्वेनात्मानुभवांशेन्यूनत्वाभावात्कैवल्यार्थिनामपिपर्याप्तभोगरूपतया
ब्रह्मस्वरूपरूपगुणविभूतिवक्षण भोग्यानन्त्येन च परमपुरुषार्थत्वं सम्भवतीत्यभिप्रेत्याह

तावत्पर्यन्तमिति, परिपूर्णब्रह्मानुभवपर्यन्तमित्यर्थः । गन्तुमशक्त्याजनास्सुकृतिन
इत्युक्तसुकृततारतम्येन ब्रह्मानुभ

वप्रतिबन्धकरूचिविशेषात् ब्रह्मानुभवं प्राप्तुमयोग्यतयेत्यर्थः । एतद्भोग्यतामिति ।
केवलात्मभोग्यतामित्यर्थः । अत्रैव स्थितानां केवलात्मन्येवप्राप्यत्वाध्यवसायशालिनामित्यर्थः । योग्यं
पर्याप्तमित्यर्थः । इत्याद्देति । इत्यभिप्रेत्य विशेषणतयात्मानुभव एव परमपुरुषार्थलक्षणमोक्ष
इत्याहेत्यर्थः । अत्र स एव मोक्ष इति सर्वबन्धविनिर्मोके सति व्यापारान्तरं
विनात्मानुभवरूपमोक्षोभवतीत्युक्त्या केवलात्मानुभवे सत्यपि निरतिशय भोग्यत्वेन
परिपूर्णब्रह्मोपासनिदिरूपव्यापारं विनातादृश ब्रह्मानुभवरूप साक्षान्मोक्षो यथा सम्भवति तथा
सर्वबलनिर्मोके सत्यपि व्यापारान्तरा केवलत्मानुभवरूपमोक्षो न सम्भवतीति वक्तुमयुक्तं ।
सेतौभग्नेजलनिर्गमवत् स्वाभाविकात्मानन्दानुभवस्य सर्वबन्धविनिर्मोके सति स्वत एव सम्भवात्
इत्यभिप्रायोणसर्वबन्धविनिर्मोकमात्ररुपोमोक्ष इति दिव्यसूरिभिरनुगृहीतामिति तात्पर्यं । अनेन
तस्मिन्नेवदिने तस्मिन्नेवमिहूर्थे मोक्षो भवतीति मोक्षशब्द प्रयोगबलात् तन्मात्ररूपोमोक्ष
इत्यत्मानुभवेमोक्ष शब्दप्रयोगबलात् सर्वबन्धविनिर्मोकमात्ररूप आत्मानुभवमोक्ष इति मात्रशब्द
प्रयोगबलाच्च केवलात्मानुभवस्य मोक्षत्वं दृढीकृत्यमित्यपि तात्पर्यं । एवं केवलात्मानुभवस्य
परमप्राप्यत्वोक्यौ प्रथमशतकद्वितीयशतकपञ्चमगाधायां केवलात्मानुभवनिरासः कथं घटत
इत्याशङ्कय परिपूर्णब्रह्मानुभवरूपस्वप्राप्त्यन्तर्गतकेवलात्मानुभवमात्रं परम
प्राप्यत्वेनाभ्युपगमच्छतामधिक्षेवस्सम्भवतीत्येतदर्थ परं द्रमिडोपनिषद्भाष्यस्थं योग्यं
भवतीत्येतदनन्तरवाक्यमप्यत्रानुसन्धेयं । इत्थं केवलात्मानुभवस्य परमव्याप्तत्व

प्रदर्शनपरमदिव्यसूक्तौ सर्वबन्धविनिर्मोके मोक्षशब्दप्रयोग पूर्वकं केवलात्मानुभवे तदभेदोक्त्या
व्यापारान्तरं विना तन्मात्रेलाभोक्त्या केवलात्मानुभवे मोक्ष शब्दोक्त्या तस्य साक्षान्मोक्षत्वोक्त्या च
चतुर्धातस्य नित्यत्वं प्रसाद्य

अष्टमशतकाष्टमदशकसप्तमगाधासूक्तौद्विवारं केवलात्मानुभवस्य सावधारणं साक्षान्मोक्षत्वोक्त्या
द्विवारमोक्षान्तर्गतमहानन्दन्वोक्त्या च केवलात्मानुभवस्यनित्यत्वं साधयितु प्रकृतोपयुक्तं
तत्सूक्त्येकदेशतद्विवरण सूक्त्येकदेशं चोपादत्ते, स एव मोक्ष इत्यादिना । तच्छब्दः विशेषण, तया
केवलात्मानुभवपरः । मोक्षशब्दस्साक्षान्मोक्षपरः । एवकारेणस्वातन्त्र्येण केवलात्मानुभवो व्यावर्त्यते
। एतत्सूक्तिं विवृणोति पूर्वोक्तेति । भगवत्प्रकारतया केवलात्मानुभवः साक्षान्मोक्ष इति
पूर्वसूक्तयभिप्रेतेत्यर्थः । अत्रापिमोक्ष शब्दस्साक्षान्मोक्षपरः । अण स एव मोक्ष इति प्रतीकोपादानेन
स एव मोक्ष इति तृतीयपादादिमं वाक्यं तद्वयाख्यानवाक्यं च तन्त्रेषोपात्त

मिति द्रष्टव्यं । तत्रत्यद्वितीयसूक्तिं विवृणोति । मोक्ष पुरुषार्थेति । साक्षान्मोक्षरूप
महापुरुषार्थान्तर्गतमहानन्दस्वरूपमपि भगवत्प्रकारतया केवलात्मानुभव इत्यर्थः तत्रत्य
त्रृतीयपादद्वितीय सूक्तिं विवृणोति । मोक्षसिद्धाविति । साक्षान्मोक्षलाभदशायां प्राप्तं
महानन्दस्वरूपमपि भगवत्प्रकारतया केवलात्मानुभवरूपत्वेन पूर्वोक्तात्मानुभव इत्यर्थः । इति
चेतिपूर्ववत् । इत्थं श्रीपराङ्कुशमिनिदिव्यसूक्तयष्टक तद्वयाख्यान प्रदर्शनमुखेन कैवल्यनित्यत्वं
साधितं । अथ श्री भट्टनाथसूक्तिव्याख्यान सूक्तिद्वयमुखेन तत्स्साध्यते । मङ्गलाशासन
प्रबन्धश्त्यादिना श्रीकृष्णपादसूनुश्रीरम्यजमातृ देवसमाख्यात आचार्य कृत व्याख्यान इत्यर्थ ।

तत्सूक्तिविवरणं स्फुटत्वान्नतन्यते । इति चेति पूर्ववत् । तदीयव्याख्यानान्तर इति । यामुनसूनु श्रीमत्कृष्टसामाहवाचार्यविरचित इत्यर्थः । एवं तन्निरस्य स्थिरेच्छायामिति दिव्यसूक्ता वापाताप्रतीतार्थानुसारेणस्पुटार्थकानेक दिव्यसूक्त्यन्यथा करणमयुक्तमितिस्थितं । यदपिरहस्यविवेकेऽनुगृहीतं । नगरं प्रविविक्षोरध्वगस्यछायातरूमूलस्वापवत् आत्मानुभवविलम्ब इति कल्पनस्य कल्पकं नास्तीति । तस्यायमभिप्रायः । जिज्ञासो ब्रह्मप्राप्तिकामनाविरहेण नगरं प्रविविक्षोरिति दृष्टान्तस्तावदयुक्तः । जिज्ञासुर्लभते भक्तिमित्युक्तरीत्या आत्मप्राप्यनन्तरंजिज्ञासोर्बह्मप्राप्तिकामनया भगवद्भक्तिसम्भवेपि आत्मप्राप्ति

साधनानुष्ट्वानदशायां ब्रह्मप्राप्तिकामनाविरहात् । कैवल्यार्थिनः आत्मानुभवस्य पर्थममेव उद्देश्यतया कैवल्यस्थानस्यमार्गत्वोक्त्यसम्भवाच्चछायातरूमूलस्छानीयकैवल्यस्थान विशेषस्य प्रमाणसम्प्रतिपन्नत्वाभावेन तस्मिन्स्थाने स्वापस्थानीयस्वात्मानुभवोक्त्यसम्भवाच्च । तद्य इत्थं विदुर्येचेमेरव्य इत्यादौ तेर्चिषमभिसम्भवतीत्यारभ्य स एनान् ब्रह्मगमयतीति श्रवणेन मध्येफलान्तरानुभवविलम्बस्य श्रुतिविरूद्धत्वाच्च । इति कल्पनस्येति कल्पनशब्देन पूर्वाचार्यैरेव वक्तेश्चित कैवल्यानित्यत्वक्ष्य उक्ततया तद्युक्त सम्भवपरिहारायान्वारूहयवादेन अतिक्षोदाक्षमन्यायकल्पनं कृतमिति सूचितं । यदपि रहस्यविवेके जिज्ञासोरात्मानुभव विलम्बेन ब्रह्मप्राप्तौ मधुविद्यान्याय एव कल्पक इत्यत्रदू,णमनुगृहीतं । अन्यायो मधुविद्यान्यायः कथमिति चेत् । मधुविद्यायां कार्यकारणोभयावस्थ ब्रह्मोपासनद्भावात् कल्पान्तरेष्यनित्यस्वादिप्राप्तौसत्यामनित्यकार्यावस्थ ब्रह्मानुभवस्सम्भवति । नित्ये परमपदेतदनुभूतेवानसम्भवति । तदन्ते कारणावस्थनित्यविशेष्य परब्रह्मणो नित्ये परमपदेनित्यस्यस्वस्यानुभवस्सम्भवति । विशेषणस्यादित्यस्या नित्यत्वात्तदनुभवः परमपदेनसम्भवति

। पञ्चाग्निविद्यायां प्रकृतिवियुक्त ब्रह्मात्मकस्वात्मोपासनसद्भावान्नित्यात्मानुभक्तो अनित्यदेशकालयोर्न सम्भवति प्रकृति वियुक्तात्मानुभवः प्रकृति मण्डलेन सम्भवति । तस्मादन्यायोमधुविद्यान्यायः । ईदृशपर्वक्रमणेच्छापि पूर्वनास्तिजिज्ञासुः प्रकृति वियुक्तात्मस्वरूपावाप्तेच्छुरिति हि भाष्यं । प्रकृति वियुक्तात्मास्वरूपावाप्तिर्हि प्रकृतिमण्डलेन सम्भवति। सुकृतमपितन्मूलत्वेनह्रयभिहितं । तस्मात्पर्वक्रमनियतिर्नास्तिकल्पनं मूलग्रन्थविरूद्धं । अर्चिरादिगतो विलम्बकल्पनं प्रकृतिमण्डलेस्थान कल्पनञ्च विरजापरमव्योम्नोरन्तरं केवलं स्मृतमित्यादि प्रमाण विरुद्धं । अतोदृष्टान्तकल्पनानिचव्यर्थानि । सर्वकामांश्च साक्षरान् । कैवल्यं भगवन्तं चेत्यादिष्वक्षरकैवल्य शब्दौ जिज्ञासिविषयौ । अव्यक्तोक्षर इत्युक्तः । येत्वक्षरमनिर्देश्यं केवलात्मन्यपर्यवस्यन् अथ कैवल्यार्थिनामित्यादि प्रयोगात् । ब्रह्मानुभव प्रतिबन्ककर्मणस्सत्वात् । आत्मानुभवो न नश्यतीत्यस्य नियामकं । य प्राप्य न निवर्तन्ते तद्धामपरमं मम । तच्छापुनरावृत्तिलक्षणमित्यादीति । अत्रायमभिप्रायोऽनुसन्धेयः ।

अन्याय इति । अपन्याय इत्यर्थः । अन्यायश्चानेकार्थत्वमिति वत् । अपशुन्यायेन प्रशस्त्यन्यायेनभवतीति तात्पर्यं । पूर्वाचार्य सूक्तेरूक्तयसम्भवपरिहारार्थमत्यन्तक्षोदाक्षमन्यायकल्पनस्यैवाभिप्रेतत्कादिति भावः । मधुविद्यानुबन्धीन्वाय स्साधकद्देतुः ।